संपत्ति: शफराजितं विपदिह प्राणप्रयाणावधि ॥ ३३ ॥

मत्सरङ्क निरातङ्कं मज्जसि क्षीरवारिधौ ।
अथवा जाठरकाकुराकुलो कुरुते न किम् ॥ ३४ ॥

वसन्ति पुष्पिता: सर्वे त्वामासाद्य नवद्रुमा: ।
अहो दैवगति: क्रूरा प्रलूनं बदरीवनम् ॥ ३५ ॥

---

१ । क. विक्षितो   २ । क. ब्रूम

श्रीमद् वसन्त भवदभ्युदयेन वृक्षाः
के वापि पुष्पफलपल्लवशालिन स्युः ।
अस्माकमल्प तपसां वदरीतरूणां
भ्रष्टं फलं चिरशिखापटलं च लूनम् ॥ ३६ ॥

अतीताः पन्थानो हिमशिखरि कैलासविषमाः
समारूढो मेरुस्तदुपरि च दृष्टः सुरतरुः ।
कृतं यत्कर्त्तव्यं किमपरमतः स्वस्ति भवते-
विघातस्त्वत्पाणौ मम तु सकलं पौरुषमपि ॥ ३७ ॥

अपारः पाथोधिः पुलिनपदवी योजनशतं
निरालम्वो मार्गो वियति परिशून्या दशदिशः ।
अये सोऽयं काकः कति कति पदान्येव गगने
मुहुर्भ्रामं भ्रामं पतति गुणवृक्षे पुनरपि । ३८ ॥

एणीश्रेणी शशकनिकरः शल्लकीनां समूहः-
केकिव्यूहो वसति नितरां यत्र कुत्रापि कुञ्जे ।
कोऽयं धन्यः कथय सुकृती पादपोऽभ्रं लिहस्तो-
यस्य च्छायामयमनुसरत्यातपार्त्तः करीन्द्रः ॥ ३९ ॥

किं जातोऽसि चतुष्पथे घनतरुच्छन्नोऽसि[१] किं च्छायया-
च्छन्नश्चेत्फलितोऽसि किं फलभरैर्नम्रोऽसि कस्मात्पुनः ।
हे सद्वृक्ष सहस्व संप्रति तथा शाखा शतांदोलनं
क्षोभोन्मोलन भञ्जनानि जनितैः स्वैरेव दुश्चेष्टितैः ॥ ४० ॥

नतादृक्कर्पूरे नहि मलयजे नो मृगमदे
फले वा पुष्पे वा त्वयि वसति यादृक् परिमलः ।
परं त्वेको दोषः फलपरिणतौ चूत नितरां-
पिके वा काके वा गुरुलघुविशेषो न भजसि ॥ ४१ ॥

---

१ । छादोऽसि

यावत्फलोदयमभूत्सहकारजात-
स्तावच्च कण्टकशतैः परिवेष्टितोऽसि ।
छायापि तेन सुलभा फलमस्तु दूरे
त्वं निष्फलोऽसि वदरीसुखसेवनीया ॥ ४२ ॥

दिङ्मण्डलं परिमलैः सुरभीकरोषि
सौन्दर्यमावहसि लोचनलोभनीयम् ।
हं हो रसालफलवर्य तथापि दूरे-
यद्ग्रन्थिलं सुकठिनं हृदयं विधत्से ।। ४३ ॥

येऽमी ते वकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदाः
ते तिष्ठन्ति फलोदये बहिरहो दृष्ट्वा न सभाषते ।
ये कीटास्तवदृक्पथं न च गतास्ते त्वत्फलाभ्यन्तरे-
धिक् त्वां चूततरो परापरपरिज्ञानानभिरज्ञो भवान् ॥ ४४ ॥

भज बहुतरक्रूरं स्पर्शं बहिस्त्वच संभवं
स्खलय[1] च सखे कामं तमुग्रकण्टक सन्ततिम् ।
सपदि विगततृप्तिं पुंसामतर्कित संभवा-
पनस भवतो जानाभ्यन्तर्गतश्च माधुरीम् ॥ ४५ ॥

उच्चैरेष तरुः फलं हि पृथुलं दृष्टैव हृष्टः शुकः
शालेरास्यगतां[2] विहाय कणिकां तन्नारिकेलं गतः ।
तत्रारुह्य वुभुक्षितेन मनसा यत्ने कृते भेदने
आशा तत्र न केवलं विगलिता चञ्चुर्गता चूर्णताम् ॥ ४६ ॥

पदाब्जेनाशोको वकुलविटपोवक्त्र-सुरया-
स्तनाभ्यां संश्लिष्टो विकसति सचाप[3] कुरुवकः ।
तदा पादस्पृष्टे मुखमधुनि सिक्ते तरुवरः[4]
स्तनाभ्यां सश्लिष्टो न खलु कुसुमं पिप्पलतरुम् ॥ ४७ ॥

१। मलय
२। क. राशिगतां
३। स चायं
४। ख. तरुवकः

छायाभिः प्रथमं ततस्तु कुसुमैः पत्रैः फलैः स्वादुभि-
रुच्चैरेष तरुः सदैव पथिकैः श्रान्तैः समाश्रियते ।
को जानाति यदस्य कोटरगतः प्रत्यग्रहालाहल-
ज्वालाजालकरालकालफणक[1]कृष्णाफणो वर्त्तते ॥ ४८ ॥

नात्र व्याधशराः पतन्ति परितो नैवात्र दावानलो
नैवो बाणतमोतिरस्ति[2] चपला नैवाथवा वागुराः ।
इत्यालोच्य कुरङ्गकेर्लिविहितो नक्षत्रराजाश्रयः
को जानाति विधिर्विधास्यति पुनः स्वर्भानुजातव्रणम्[3] ॥ ४९ ॥

उत्तुङ्गैस्तरुभिः किमेभिरफलैराकाशविस्पर्द्धिभिः
धन्योऽसौ नितरां सुशीरविटपो नद्यास्तटे तिष्ठति ।
एवं यः कृतबद्धिरुद्धतजले व्यालोलवीचिवशा-
न्मज्जन्तं जनमुद्धरामि सह वा तेनैव मज्जाम्यहम् ॥ ५० ॥

श्रीखण्डे परिखण्डिते सुरतरौ याते च पातुं वने-
निःसारे घनसारशाखि निमिलद्भृङ्गे लवङ्गे द्रुमे ।
सानन्दं वत भूय ते तृणतरुः सर्वोपदुष्टादसि
त्वं गच्छादव एकवित्य विरतं हर्षोत्तरैर्नागरैः ॥ ५१ ॥

अपसर मधुकर दूरं परिमलबहुले केतकीकुसुमे ।
इह नहि मधुलवलाभो भवति परं धूलिधूसरं बदनम् ॥ ५२ ॥

दृष्टयापीतो भवदलिरसौ लेखपद्मं विशालं
रूपं वर्णं किमिति किमिति व्याहरन् निष्पपात ।
गन्धो नासीत् न च मधुरता नास्ति वै सौकुमार्यो
घूर्णन् घूर्णन्नवनतमुखो व्रीडया निर्जगाम ॥ ५३ ॥

१। क. फलक
२। ख. रत्रि
३। क. दन्तव्रणम्

श्रीहस्तन्यस्तलीलाकमलगतगजग्रामणीगण्डसीमा
निःसीमानन्ददान[1]प्रभवमृतनदीपूरपूर्णप्रमोदाः ।
दृग्भङ्गी नैव भङ्गी विलसति वकुले नर्मचूते न सूते
पुन्नागे नैव रागं कलयति किमयं वासके वासकेलिम् ॥ ५४ ॥

नन्दजन्मा मधुपः सुरतरुकुसुमेषु पीत मकरन्दः ।
दैवादवनिमुपेतः कूटजकुसुमे समीहते वृत्तिम् ॥ ५५ ॥

अपिदलन्मुकुले[2] वकुले यया पदमदायि कदापि न हेलया ।
अहह सा सहसा बिधुरे विधौ मधुकरी वदरी मनुवर्त्तते ॥ ५६ ॥

अमी शब्दायन्ते मधुरमधुरं षट्पदगणाः
घनायन्ते पद्मा प्रतिदिनममूषां सुमनसाम् ।
तथाप्येतद्गानं प्रियसखकुहूकण्ठ भवतो
वसन्ते सन्तापं वहति सह तेनाम्बुज मनः ॥ ५७ ॥

कुहूमात्रो मन्त्रः किमुत कृतिनां तीर्थतिलके
त्वया जप्तो नून परभृतविशुद्धेन मनसा ।
यदज्ञानं मान त्यजति वनिता मोद्यति सुखा-
मृतोऽनङ्गो जीवत्यहह विरही मूर्च्छति मुहुः ॥ ५८ ॥

अयि वनप्रिय विस्मृत एव किं वलिभुजो विघसो भवतोधुना ।
यदधुनैव कुहूरिति विद्यया न पतितश्चरणौ घरणौ तव ॥ ५९ ॥

बाले वालमृणालकोमलकरे कान्तस्य संप्रार्थिनी-
काकस्यास्य विवेकशून्यमनसो मा देहि मुग्धे वलिम् ।
भ्रान्त्या यः सुतवत्सलं पिकसुतं पुष्णाति यत्नैरपि[3]
सोऽयं मानसमागमः कथमहो ज्ञातुं समर्थः सुखी ॥ ६० ॥

१ । ख. निःसामास्यान्दिदान
२ । क. अपिदलन्मुकुले
ख. न्मुकुले
३ । ख. यत्नेरपि

किं केकीव शिखण्डिमण्डिततनुः किं कोत्खपाठकः
किं वा हंस इवाङ्गना गुरुगतिः किं सारिकासुस्वरः ।
किं वा चन्द्रशकुन्त पावकभव कर्णामृतं स्यन्दते
कोकः केन गुणेन काञ्चनमये संचारितः पञ्जरे ॥ ६१ ॥

एकः कपोतपोतः शतशः श्येनाः क्षुधानुधावन्ति ।
अम्बरमावृतिशून्यं शिव शिव शरणं विधे करुणा ॥ ६२ ॥

कुग्रामेषु जरत्कुलीरकवल[1]ग्रासोल्लसन्मानसा-
फेत्कारैर्निशि फेरवास्तनुभृतां तन्वन्ति कर्णज्वरम् ।
माद्यत्कुञ्जरकुम्भकुट्टदलनव्यापारपारङ्गम
पारीन्द्रः पुनरेष मुद्रितमुखः कुत्रापि निद्रायते ॥ ६३ ॥

गच्छ शूकर भद्रं ते ब्रूहि सिंहो मयाजितः ।
पण्डितास्तत्र जानन्ति सिंहशूकरयोर्बलम् ॥ ६४ ॥

एकोऽहमसहायोऽहं कृशोहमपरिच्छदः ।
शुकोप्येवंविधा चिन्ता मृगेन्द्रस्य न विद्यते ॥ ६५ ॥

अरे जम्बूक त्वं मृगपतिरहं किन्तु पदवी
समानीयस्तत्रोरसयसि किमित्थं चपलताम् ।
असौ खण्डाभोगस्थगित-मदलेखाविलुलित
द्विरेफ-प्रोद्गीत द्विरददलनो भेद विभवः ॥ ६६ ॥

मृगवञ्चक मृगपोतान् वञ्चय वञ्चनेन ते रतिः ।
केशरी किशोरकैः सह खुरलीखेलास्तवैव निधनाय ॥ ६७ ॥

एकेन किंकरवरेण विनिर्गतेन विन्ध्यस्य मत्तगजयूथशताकुलस्य
तस्यापि गुञ्ज[2] दलिपुञ्ज निपीयमानदानाम्भसः
करिपते वद हीयते किम् ॥ ६८ ॥

---

१ । ख. कुलारकवल

२ । ख. कुञ्ज

सुर: क्षोभ कीड़ा दरदकमलं मर्दय मुनीन्
तथाशुण्डाघातै: प्रहर मधुपान् गण्डलुलितान् ।
यदा सारङ्गाक्षी[1] कुचकठिनकुम्भस्तनतटे
मृग क्रीडां धत्ते क्व पुनरयमाडम्बरभर: ॥ ६९ ॥

कुतो पयसि तापेन करप्रसारितकरिणा ।
सोपि न लिप्त: पयसा लाघवमात्मापरं नीत: ॥ ७० ॥

चिन्ता च मावहति किं गजयूथनाथ
योगीव योगविनिमीलितनेत्रयुग्म: ।
पिण्डं गृहाण पिब वारि यदोपनीतं
दैवाद्भवन्ति विपद: खलु संपदो वा ॥ ७१ ॥

नो खिद्ये दृढबन्धनाय तमिदं नैवाङ्कुशोद्‌घाटनात्
यन्त्रारोहणताडनात् परिभवं दैवान्यदेशागमात् ।
चिन्ता मे जनयन्ति चेतसि कथां श्रुत्वा स्वयूथं वने
सिंहत्रासित भीरु भीरुकलभा यास्यन्ति कस्याश्रयम् ॥ ७२ ॥

तासां दृष्टया नयनसुषमा वङ्गवीराङ्गनानां
राष्ट्रत्याग परमकृतिभि: कृष्णसारैरकारि ।
तासामेव स्तनभरजिता कुम्भिका: सन्ति मत्ता:
प्रायो मूर्ख: परिभवविधौ नाभिमानं तनोति ॥ ७३ ॥

स्थलीनां दग्धानमुपरि मृगतृष्णामनुसरन्
तृषाभि: सारङ्गो न च विरमति क्षीणहृदय: ।
अजानन् तत्तत्त्वं न च मृगयतेऽप्यन्यसरसी-
मभूमौ प्रत्याशा न च फलति विघ्नं च कुरुते ॥ ७४ ॥

---

१ । क.ख. तत्कुरङ्गाक्षी

रज्वा विष: प्रवितताां सलिलं विषाक्त-
ख्याता महीभृतभुजा ज्वलिता वनान्ता: ।
व्याघा: पदान्यनुसरन्ति गृहीतपाशा:
किं देशमाश्रयतु डिम्भवती कुरङ्गी ॥ ७५ ॥

अग्रे व्याधाः करधृतशरा: पार्श्वतो जालमाला
पृष्ठे वह्निर्दहति विपिनं संनिधौ सारमेया: ।
एणीगर्भादलसगमना बालका: क्रोडलीना:
प्रत्यासन्ने चकितहरिणी किं करोमि क्व यामि ॥ ७६ ॥

अयि कुरङ्ग तुरङ्गम विक्रमे त्यज वनं जवनं गमनं कुरु ।
इह वने हि वनेचर नायिका: सुरभिलाहितलोलितसायका: ॥ ७७ ॥

आस्वाद्यं तृणमस्ति सन्ति रुचिरा: क्षोणीरुहां पल्लवां
सौहित्याशयजं नवं भज भृशं मातेव मन्दस्थिता ।
तं बाह्यादपि पुष्पितावधिकृतामुच्चार्य संभाषसे
सैषाच्छाग निरागसोऽपि भवतो दीर्घायुषो द्वेषिणी ॥ ७८ ॥

अयं वाणी गन्धो मम कमलसाक्षी मधुकरं
सुरश्रेणी चैते हृदपि जडजातिषु विपुल: ।
सुदीशानिर्वाणो हरिणहृतचेतो हृतरसो
विधत्ते सिद्धिं किं भणतु तव चित्तस्य हरणे ॥ ७९ ॥

निजकरनिकरसमृद्ध्या धवलय भूवनानि पार्वण शशाङ्क ।
हन्ति हन्त न सहते हतविधिरिह सुस्थितं कमलम् ॥ ८० ॥

उभौ पक्षौ शुक्लौ वियति भुवि चावारितगति:[१]
सदा मौनं भुंक्ते वसति सकलस्थाणु शिरसि ।
वके चन्द्रे[२] सर्वो गुणसमुदय: कश्चिदधिको-
गुणा: स्थाने मान्या: नरवर न तु स्थानरहिता: ॥ ८१ ॥

१। क. वारिदगति

२। ख. वकेचान्द्रि

मातर्मा भज कालकूटभगिनी स्वप्नेऽपि पद्मालये
व्याधिभूय कदर्थयन्ति बहुशो लोकान्विकारास्तव ।
चक्षुर्नैव निरीक्षते स्वविषयं गृह्णाति नैव श्रुतिः-
प्राणा एव वरं प्रयान्ति न पुनर्नियान्ति वाचो मुखात् ॥ ८२ ॥

अपूर्वरसनाव्याली खलाननविलेशया ।
स्पृशत्यन्यस्य कर्णं वै हरत्यन्यस्य जीवितम् ॥ ८३ ॥

मास्तु फणासंरम्भो मा सन्तु तवोग्रविषमुखे दन्ताः ।
मास्तु तव गर्जितमहो दर्शनं रचतां महीभोत्यै ॥ ८४ ॥

भेको धावति तृष्णया प्रतिदिशं क्रुद्धः पतङ्गं प्रति
भेकं धावति कालकूटविषमः सर्पो भुजङ्गं शिखी ।
तं चाखेटक एष धावति मुदा व्याघ्रस्तथा खेटक-
मित्यन्योऽन्य विधाय हृष्टमनसः पश्यन्ति नात्मक्षयम् ॥ ८५ ॥

भ्रष्टं जन्मभुवस्ततो निपतितं हस्ते वनावासिनां
विक्रेतुं तुलितं ततोऽपि लवशः कृत्वा प्रकृष्टं ततः ।
एवं दुष्कृतजन्मनिर्मितवशात् कष्टं गतं चन्दनं
वर्द्धन्ते मनुजां विपद्यपि सतां केनादरस्त्यज्यते ॥ ८६ ॥

मलयज मा वह खेदं भेदनघर्षणसम्भवैर्दुःखैः ।
निजगुणगर्जसंतर्पणवैरिणि विधि वर्त्तते नित्यम् ॥ ८७ ॥

शुद्धो वा मलिनोऽस्तु वा मृगमदः किं तावदेतावता
किं तस्यानवधिश्चमत्कृतिविधिः सौरभ्यमेकं वरम् ।
येनालङ्करणक्षणे करतले भाले कपोले गले
दोर्मूले कुचमण्डले च कुरुते सङ्गं कुरङ्गीदृशः ॥ ८८ ॥

चन्दनागुरुकाश्मीरचन्द्रकस्तूरीकासमम् ।
ये कुर्वन्ति गुणाभिज्ञास्तेभ्योऽस्त्वञ्जलिसन्ततिः ॥ ८९ ॥

मृगमद मा कुरु गर्वं परिमलमात्रेण मत्तोऽसि ।
परिमलतायां निर्मलं किमपि पुनः सुकुमार्यतामन्यत् ॥ ९० ॥

वयं बाल्ये बालान् रमयसि युवानः परिणतौ
भजामः कामेषु गुणि विगुणिनो यौवनवताम् ।
तयारब्धं जन्म क्षणयसि विधि व्यर्थमधुना-
नना श्रोत्रे पुत्रो क्वचिदपि सतो लाञ्छनमभूत् ॥ ९१ ॥

हे हेमकार परदुःख विचारमूढ
किं मां भृशं दहति वारशतानि वह्नौ ।
आताडिते मयि च याति गुणातिरेकं
लाभस्तवैव भवने किल भस्मपातः ॥ ९२ ॥

नद्याम्भोवरलीलया कलुषितं दृष्ट्वा स्वपद्माकरं
हंसो व्याकुलमानसा सरभसं यातः स्वयं मानसम्[१] ।
मध्ये मार्गमसौ किरातशिशुना बध्याकृतः पञ्जरे
दूरे तिष्ठतु नाम निर्मलपयोहंसः कथं जीवतु ॥ ९३ ॥

येनानेकसरोजकुन्दविपिने पीतं मधु स्वेच्छया
लीनं चूतकदम्बचम्पकवने येन प्रमोदान्मुहुः ।
मल्ली जातीलवङ्गकेशरवने सम्प्रेरितो वासयन्[२]
सोऽयं दैव विडम्बितो मधुकर शेफालिमालिङ्गति ॥ ९४ ॥

दीनं परित्यज्य धनैर्धनेशो धनेश्वरानेव कृतार्थयन्ति ।
नद्यः परित्यज्य कृषिप्रदेशमम्भो दुरम्भोनिधिमध्यलीनाः ॥ ९५ ॥

आच्छन्नं सकलं नभस्थलमिदं मग्नस्थितो भानुमान्
विद्युत्पुञ्ज विजृम्भणात्सचकितं नीपं ततो जन्तवः ।
आसां गर्जनपूरणमुदिरतो शापेयमाडम्बरो
दृष्टिश्चैव जया च चातकशिशुं कण्ठोऽपि नाविस्तृता ॥ ९६ ॥

---

१ । मानसः   २ । वासरान्

संतप्तायसि संस्थितेषु पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते ।
अन्तः सागर शुक्तिगर्भपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥ ९७ ॥

जातस्तन्यं न जग्राह कण्ठीरवकिशोरकः ।
चक्षु व्यापारयमास कुञ्जे कुञ्जरशालिनी ॥ ९८ ।

कष्टं किमत्र करवै विधिवैपरित्ये
शैवालजालकवलाः किल राजहंसाः ।
अङ्गारपुञ्जमलिना अपि वै द्विरेफा
फुल्लारविन्दमकरन्दभुजो वभूवुः ॥ ९९ ॥

अम्भोजनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
नत्वस्य दुग्ध जलभेदविधौ प्रसिद्धां
वैदग्ध्य कीर्तिमपहर्तुं मसौ समर्थः ॥ १०० ॥

इतिश्रीभुवनानन्दकविराजेश्वरश्रीमन्श्रीवरचूडामणि-
विरचिते अन्यापदेशश्लोकशतकं समाप्तम् ।

नारायणशतकम्

नारायणशतकम्

मङ्गलाचरणम् —

स्वं चिद्रत्नं चिरत्नं यदि समुदयते नष्टमन्वेष्टुमिच्छा
श्रेयः पात्रे तदा स्वे हृदि मिलदमलस्नेहपूरस्य पूर्णे ।
आसाद्य द्योतमानं भृशमकृशदशां सहृतांहः पतङ्गं
दध्या दध्यात्मदीपं दलिततमतमस्तोममीशस्य धामः ॥ १ ॥

पादयोः वर्णनम् —

हित्वोरः पीठपद्मं तदितरललनालभ्यवाल्लभ्यसीमां
हस्ताभ्यां विभ्रमाब्जे अपि सुभगतमे किंच संसारचारुम्[1] ।
स्नेहार्द्धि प्रस्नुवानामपि वनजवनीमादरादूरुयुग्मे
न्यस्याम्भाजालया यत्परिचरति हरेस्तत्स्मरेत्पादपद्मम् ॥ २ ॥

बुद्ध्वा वैधात्र[2]लोकावधि विविधवधूदुर्द्दं तोर्गह्यं गर्भा
बीभत्सन्ते महान्तः कुललितललनावक्त्रलालामलेभ्यः ।
तस्य ध्यातव्यमद्धामृतरसमधुनः पादपद्मद्वयस्य
व्यक्तस्याम्नायमौलावमलमनुभवात्स्वप्रकाशस्य यस्य ॥ ३ ॥

नाभ्यम्भोजं निजावेशनमद उदरस्थास्तु विश्वेक्षणाय
द्वारं वेधा हरः संहरणमयदुरन्ताधिकारस्य मूलम् ।
शूलं पूर्पां जसास्याः प्रतिकृतमतुलां मुक्त्यधिकारमुद्रां
मुक्त्वा यां हस्तपद्मे नमति भजतु तां पद्द्वयीमद्वयस्य ॥ ४ ॥

त्रातुं तापत्रयार्त्तान् स्वयमयमुदकीभूय धर्मंद्रवीति
व्यक्तो याभ्यां निधाङ्कं परिचरति सदा कामदा कामसूर्यौ ।
व्यज्योद्‌र्ध्वे रेखिके द्वे व्यभजदिव विभुर्यंच्चतुर्वर्गसीमाः
पादौ निर्वाणहेतोः कलिकलुषभिदौ चिन्तयोपाददीत ॥ ५ ॥

---

१ । संचार चारुम् २ । वैधात्र

जंघयोः वर्णनम् —

जंघे वृत्तानुपूर्वे अमृत[1]रसमिव स्वे किरन्ती करेण
क्षिप्त्वा लीलारविन्दं परुषतरमिव श्रीः सुखस्पर्शसीम्ना ।
शर्मान्यद्विस्मरन्ति परिमृशति शनैर्ये भृशं भीतभीता
ते सान्द्रानन्दथुः संस्मरतु मुनिजनो जन्ममृत्यूजिहासुः ॥ ६ ॥

जंघाकाण्डः क्षणार्द्धविगणितगमनाभोग[2]जघालभावो
भाव्यो वेदेन जंघाकरिक इति विनाप्यंघ्रिणा श्लाघितस्य ।
दुर्लंघ्यं योगिसंघैर्विधिपदमधिरुह्य च्युतं यं स्मरन्तः
संसारप्रान्तरं दुस्तरमपि तरितुं जांघिकत्वं भजन्ते ॥ ७ ॥

जानुयुग्मस्य वर्णनम् —

ध्यायेल्लावण्यलक्ष्मीमणिमयमुकुरम्मन्ययोर्जानुनोस्त-
द्युग्मं मंजीरताराारुणमणिकिरणैः कुंकुमैः पंकिलाङ्कम् ।
दीर्णस्यारोप्य तत्र त्रिदशरिपुपतेर्लिप्तमद्यापि रक्तं-
मंत्वा यन्मार्ष्टुमाप्ताः करजकरजलैः क्षालयन्तो भुजान्ताः ॥ ८ ॥

आजानाजानुबाहोः कुचकलशयुजा स्पर्द्धमानं रमाया
वृत्तं काठिन्यधामामलरुचिरुचिरं चिन्तयेद्रूपर्वं ।
नित्यं हस्तैश्चतुर्भिः सुचिरसु[3]चतुरैर्यत्स्वतन्त्रोऽपि शील-
न्वाकचिन्तागोचरोऽसौ चिरमथविषयं नान्यमादातुमिष्टे ॥ ९ ॥

ऊर्वोः वर्णनम् —

रुग्णक्लेशाटवीकं रिपुविसरसरः क्षोभिवेतण्डशुण्डा-
दण्डाभं शक्थिकाण्डं कलयतु मनसा पुण्डरीकेक्षणस्य ।
वाहुः संवाहयन्त्या जलनिधिदुहितुर्यत्र गांगेयगौरो
स्वर्गं गङ्गाम्भोजिनीव स्फुरति विकसता पाणिपाथोरुहेण ॥ १० ॥

१। पूर्वेह्यमृत   २। गगनाभोग   ३। शुचिरस

पंचेषोः स्वं जिगीषोर्मदमनकृते यस्य लावण्यलेशा-
दुर्वश्यासीद्द्युवेश्याभरणमुभयथाक्षिप्तरम्भोरुलक्ष्मीः ।
लक्ष्मीर्वश्येषु पुत्रेष्विव रचितरतिर्यत्प्रसूतेष्ववश्यं
ध्यायेन्नारायणारोरमरततित[1]तपोविघ्नवर्गार्गलायाः ॥ ११ ॥

स्थूलत्वाद्योगयोग्याभूदजतनुगृहस्थूणसौभाग्ययोग्यं
ध्यायेदस्योरुकाण्डं निगमनिभमहाशाखिशाखाप्रकाण्डम्[2] ।
यत्र व्यायच्छमाना मुनिहृदयभटा वर्द्धमानप्रभावाः
प्रायेण प्रौढकामाद्यरिचयविजये सांयुगिना भवन्ति ॥ १२ ॥

जघनसिंहासनस्य वर्णनम् —

मध्ये लावण्यपूरं घनजघनतटछद्मना पद्मनाभ-
स्योच्चैरुद्भासमानं पुलिनममलिनं चिन्त्यतां चक्रचारु ।
यस्मिन्विश्रम्य सम्यङ्कृतिरतिचतुरा पारिकांक्षीश्वराणां
पारं संसारसिन्धोः करकमलपरिप्राप्तकल्पं विवेद ॥ १३ ॥

सारं सन्नाभिशोभं द्युमणिगणलसत्तेजसा भ्राजमानं
श्रीकान्तस्यान्तरङ्गं जघनमिति मतं चक्रमन्यद्विचिन्त्यम् ।
धारा सौदर्शनी सा जरठरिपुघटादुःसहा यत्सहाया
ग्रीवाग्राण्यच्छिदार्यै भिदुरमदभिदि प्राभवत्कैटभीये ॥ १४ ॥

सज्जं सिंहासनं तज्जघनमनुमनः शान्तसाम्राज्यसुस्थं
स्थाप्यं यस्योपरिष्ठाल्लसति सिततमं स्पष्टरोमालिदण्डम् ।
श्रीवत्सच्छत्रमारादपि मणिरसनाहारिहीराश्मरश्मि-
श्रेणिः प्रेङ्क्षन्मराली विसृमरसुषमोड्डामरा चामराली ॥ १५ ॥

---

१ । मरकृत   २ । प्रकाण्डः

मध्यभागवर्णनम् —

मध्यं चामुष्य काञ्चीमणिगणकिरणस्पष्टगम्भीरनाभी-
शोभं तद्गर्त्तगर्भोत्थितशितिभुजगी भ्रान्तिभृल्लोमलेखम्[1] ।
कालिन्दीभङ्गभङ्गी प्रबलवलिकुलासन्नराजीवराजी
पांशुक्तूपांशुलत्विड्वसननिवसितं चिन्तनीयं तनीयः ॥ १६ ॥

पीताम्बरवर्णनम् —

स्फीतं पीताम्बरस्याम्बरमपि मनसा संस्तवीता[2]स्तसाम्यं
यत्तेजः पीतभावाद्दितरकनकरुग्वस्तुनः पीतनाम ।
यस्याभ्यर्णेसुवर्णक्षितिधरशिखरक्षेपदक्षे समित्यां
वेपेते म्लान्युपेते वत पतगपतेस्त्वत्स्नुनो किं पतत्रे ॥ १७ ॥

जम्बूजाम्बुस्रवन्ती तटकनककलत्पङ्कशङ्कां दधानं
सिद्धानां चेतसंशं वसनमनुसरेद्यत्सकाशे चकास्ति ।
काञ्चीमाणिक्यसौघो जघननिहतयोः प्राङ्मघोः कैटभस्य
प्रायस्तादृक् शिरो जाम्बवयुगलगलल्लोहिताम्बु प्रवाहः ॥ १८ ॥

विस्पष्टं तद्वपुष्यावरणमनुगुणं लीढनीलाभ्रलीले
विक्षेपं चामरीचामरमृदुपवनेनात्मनाप्याददाने ।
स्वध्यातृणां नृणां तद्द्वयमपनुदतो जीवभावे निदानं
विद्युद्विद्योतहृद्ये हृदि बहतु हरेरन्तरीयोत्तरीये ॥ १९ ॥

नाभिह्रदस्य वर्णनम् —

उन्मीलल्लोमलेखा मृदुल नवलतामूलबद्धालवालं
धातुः सिद्धादिमस्यासुनियमनविलं मूलपद्मालयस्य ।
संक्षिप्तानां स्वकुक्षौ किल लयसमये पिष्टपानां प्रवेश-
द्वारं नाभौं गभीरां भुवनभयभिदश्चिन्तयेश्चेतसोऽन्तः ॥ २० ॥

---

१ । भृद्रोमलेखं   २ । संस्तुवीता

घत्तां चित्तेऽस्य नाभीहृदमिति[१] हृदयाह्लादनं यत्र पुण्यैः
स्नाता लावण्यतोयैर्भजति मुनिमतिः पूततां यन्निगूढम् ।
स्रष्टुश्चावेशनं सन्मधुपजनमनोरञ्जनायैव गञ्जां
कञ्जं रोमालिमालानुसरति मधुनः सौरभे बद्धबुद्धिः ॥ २१ ॥

मीनैः स्वान्तर्निलीनैर्मुनिहृदयमयैः श्लाघ्यगम्भीरिमश्री-
र्भाव्या कीर्तिप्रसूनैः सुरभिरभिनवैरब्जनाभस्य नाभिः ।
रोमाली कालियोऽसौ भजति गतिभिदः सौरभेः[२] शापपाशा-
द्दुःसर्प[३] सर्पहन्त्रा ह्रदमवकलयन्त्या कलिन्दात्मजायाः ॥ २२ ॥

रोमावली वर्णनम् —

संसारक्षारवारांनिधितरणविधौ बद्धरामालिलीला
रोमाली रुष्टियष्टिर्घनवृजिनवनीलावनी भावनीया ।
पश्यामः श्यामसूत्रं निहितमिव समं भूमिसीमाविभागं
कर्तुं भर्तुः शरीरे किल कलहजुषा यां कलत्रद्वयेन ॥ २३ ॥

नाभ्याः सरोजनाभ्या विलसदिव बहिर्भूय गर्भाज्जनन्या
बालत्वान्नीलरोमावलिनिभनिभृततन्नभोऽन्तर्निमाल्यम्[४] ।
जाने यस्यौचिती सा कविभिरभिमता श्यामता खड्गलेखो-
पक्षं[५] सद्यः प्रसूताभंकभृश[६]शिशुतोपक्रमं क्षामता च ॥ २४ ॥

नाभीकूपे दिदृक्षाकुतुकनिपतिते[७] श्रीदृशावुज्जिहीर्षोः
सज्जां रज्जुं स्मरस्य भ्रमरमयगुणं भ्रूधनुर्योगयोग्यम् ।
भ्रष्टां कण्ठोपकण्ठात्कमलजनिहितां नीलनालीकमालां
काञ्ची सक्ताश्मरश्मि स्मरतु मधुजितो राजितां रोमराजिम् ॥ २५ ॥

---

१ । नाभीहृदमति   २ । सौभरेः   ३ । शाऽन्दुः सर्पं
४ । निमाल्यः   ५ । पज्ञः   ६ । भंकईव
७ । दिदृक्षातिकुतुकपतिते

वक्षोवर्णनम् —

वक्षोघोक्षोभदक्षं नगरिपुनगरीनागरीणां गरीयः
सौन्दर्य्योद्गारि हृद्यं स्वहृदि भगवतो भावयेद्भक्तियुक्तः ।
विद्युल्लोलापि यस्मिन् सलिलघनघनश्यामले प्रेमवंश्या
पश्याप्तस्थेमसीमा कषदृषदि लसद्धे[1]मलेखेव लक्ष्मीः ॥ २६ ॥

श्रीवत्साङ्कस्य वत्सं स्मरतु चिरतरं भ्रातरावब्धिपुत्रौ
विभ्रद्यत्नेन रत्ने वरमणि रमणीवर्गयुग्मे[2] प्रधाने ।
लक्ष्मीसम्भोगलक्ष्मस्तनयुगललसत्कुङ्कुमं कौस्तुभोऽस्याः
लज्जालोपाय यस्मिंस्तिरयति तरुणार्कांशुसंकाशभासा ॥ २७ ॥

धौतं लावण्यनीरैः[3] शिशिरमपि रमाश्वाससंशैः समीरैः
सान्द्री भूतेन्द्रनीलैः सपदिमघटितं कुट्टिमं स्निग्धमुग्धम् ।
ध्यातव्यं माधवोरः सुरतरुसुमनः स्रक्स्फुरत्पुष्पतल्पे
यस्मिन्नानन्दनिद्रां भजति मुनिमनो विस्मृताशेषतापम् ॥ २८ ॥

दुर्द्धर्षं वैरिवर्गैर्विततमतिदृढं पुण्डरीकाक्षवक्षो
वीक्षेत ध्यानदृष्ट्याऽमरनगरमहाद्वाररक्षाकवाटम् ।
चित्रं तत्पार्श्वयोस्ता घनमपि घटिता अर्गलादोर्गणाख्या
गर्वेणानर्गलानां[4] समिति दितिभुवां स्वर्गमार्गं दिशन्ति ॥ २९ ॥

उद्यत्प्रद्योतनाभो मणिरुरसि लसन्पद्मनाभस्य भाव्यो
यद्दीप्तिव्याप्तिलुप्ता द्युतिरमरशिरोरत्नखद्योतराशेः ।
किम्वान्यद्दैन्यमागाददहमहदहर्दीपवत्यत्समीपे
जैत्रं नेत्रं स्फुटं धूर्जटिनिटिलतटे शोचनीयस्वरोचिः ॥ ३० ॥

---

१ । विलसद्धे
२ । वर्गयुग्म
३ । लावण्यतोयैः
४ । निर्गलानां

उद्यन्तं भानुमन्तं जननयनमुदे कौस्तुभाह्वां वहन्तं
तद्वक्षो व्योमभाजं भजतु निजहृदा पद्मरागाधिराजम् ।
तेजोजालानि बालातपपटलयता दिङ्मुखालोकहेतो[1]-
र्येन क्षीरोदशायी हरिरधिशयितोऽवोध्यसृक् सिन्धुमध्यम् ॥ ३१ ॥

श्रीविष्णोः कृष्णकान्त्या मरकतहरिणीं स्वर्णवर्णां स्वमूर्ति
भर्त्तुर्वक्षस्थलस्था क्षितिरिति विदती श्रीर्यदन्तः स्फुरन्तीम् ।
रुष्टा तुष्टा च तस्यामरुणरुचि[2]रुषा वर्णसाम्या वृतायां
छव्या नव्यार्कमित्रं मणिरियममला ध्यायतामायतास्थैः ॥ ३२ ॥

श्रीवत्साङ्कवर्णनम् —

अर्केन्द्वक्षस्य वक्षस्यधिगतसुषमं श्यामरोमालिमौली
श्रीवत्सं वत्सलात्मा स्मरतु धवलिमस्मेररोमाङ्कुराङ्कम् ।
यं केलीबालवीरुच्छिरसि विकसितं दोहदस्य प्रदाना-
द्दृशां दर्शं प्रसूनस्तवकमिव नवं मोदते पद्मसद्मा ॥ ३३ ॥

कुर्वत्पाथोद्यमसमयपयः फेनसम्पर्कतर्कं
तादृक् पीताम्बरोरोऽम्बरचरशरदच्छोदभृच्छेदलक्ष्यम् ।
चिन्त्य श्रीवत्सचिह्नं चिरमुरसि कृतं रक्षणाय प्रजानां
जाने श्रीजानिना यद्गुणमतिगुणितं सात्वतैः सत्वसंशम् ॥ ३४ ॥

भावं भावं स्वचेतः कुमुदमुदुदयो[3]दीतसोमावदातो
रोमावर्त्तोऽसुरारेरुरसि चररमा हासहृद्योऽनुमोद्यः ।
लावण्याम्भोनिधौ तद्वपुषि विपुषितोत्फेनिलावर्त्तभूतो
न प्रत्यावर्त्तनाय प्रभवति पतितं यत्र नेत्रं मुनीनाम् ॥ ३५ ॥

१। दिंमुखेत हेतो   २। तस्या मरुचिरुचि   ३। समुदयो

बाहूनां वर्णनम् —

आजानाजानुलम्बाञ्छ्रुतिपथपथिकज्ञानवृद्धावलम्बान्
राहुद्विट् बाहुदण्डान् कलयतु चतुरः क्लृप्तपाषण्डदण्डान् ।
यानुज्झित्वा विवादं विषयविषरसोदन्यया धावितानां
संरोधार्थं गवामाश्रयति यतिजनः सत्त्रिदण्डैकदण्डः ॥ ३६ ॥

कस्तूरीकर्दमं श्रीकुचकलशपरिरम्भसंरम्भलग्नं
मग्नं सान्द्रेन्द्रनीलद्युति जयिनिज[1]रङ्निर्झरे निह्नुवानान् ।
ध्यायेद्दोष्णोऽथ विष्णोर्मधुकरनिकरैर्वर्णगन्धेन दूरा-
दाकृष्टैः सन्निकृष्टैः पुनरनधिगतो हन्त यद्वर्णगन्धः ॥ ३७ ॥

सानन्दं मन्दराद्रेः क्षितियुवतिकुचोत्तुङ्गमालिङ्ग्य शृङ्गं
नानाधात्वङ्गरागच्छुरण[2]शबलिताः शूरशृङ्गारिवेशम् ।
रोमाञ्चैर्निर्विशेषं व्यदधुरुदधिजोद्वाहकाले पुरा ये
तान्भूषाभोगभाजो भुजगशयभुजान्भावनाभिभजेत ॥ ३८ ॥

निष्कम्पं कैटभस्याप्यतिविकटभुजान्वज्रगाढप्रहारान्
सोढारो भूयसोऽब्दान् त्रिभुवनभवनस्तम्भसम्भावनार्हाः ।
पर्य्याप्तं पारिहार्य्याङ्गदमयवलयै रत्नकीलानुविद्धैः
दार्ढ्याढ्यं भावुकास्ते दनुजमदभिदो बाहवो भावनीयाः ॥ ३९ ॥

दिक्पालानां वरेण्यं वपुरसुरवधे दीक्षितान् क्षत्रियाणां
जन्मक्षेत्राणि बाहून् हृदि वहतु बहूकृत्यभृत्यप्रियस्य ।
लोकानां पालनार्थं नियममुपयतां शात्रवत्रासकानां
ज्ञातं राज्ञां स्वकीयप्रभवगुणभवो लोकपालानुभावः ॥ ४० ॥

१। जिति निज   २। रागक्षरण

तृप्यद्दुर्दान्तदैत्यर्षभदमनसहं भूरिभारातुराया-
स्तद्वद्विश्वम्भराया द्रढिमबलमवष्टम्भयोग्यं दधानान् ।
ध्यायेद्योगर्द्धिसिद्ध्यै त्रियुगभुजयुगान् सांयुगीनारिहन्तुः
किं वा कालात्मनोऽस्यावयवयुगयुगद्वन्द्वरूपानुरूपान् ॥ ४१ ॥

करान् वर्णयति —

दोर्वृन्देन्दीवरस्रक्चयचरमचराम्भोजचातुर्य्यभाजां
ध्यायेच्चातुर्भुजानां विधिनिटिललिपेरुत्किराणां कराणाम् ।
क्ष्मालक्ष्म्योश्चारुगारुत्मतकनकघटाटोपवत्सु स्तनेषु
न्यस्ता ये भद्रकुम्भोपरि परिविलसत्पल्लवत्वं लभन्ते ॥ ४२ ॥

कर्त्तुं मुक्तीश्चतस्रः स्वरुचिसमुचितं योगिसाद्योगपद्ये
नोद्यच्छन्तःपुनर्यापिणि कविपणयः पाणयोऽजस्य भाव्याः ।
यैर्मुष्टामुष्टिरुष्टैरपि युधि मधुना कैटभेनापि सार्द्धं
ताभ्यां स्रष्टुः शिरोभ्यो वितरितुमभयं बद्धमुष्टित्वमोजि ॥ ४३ ॥

अङ्गुलीनां वर्णनम् —

आबद्धायानधोऽधो भृशमनिशमपां रत्नरोचिर्मयीना
पूर्णा स्वर्णालवालावलिरिव कलिता भार्मणी सोर्मिकाली ।
विद्वत्पूज्यस्य रज्यन्नखमृदुलदलानङ्गुलीभङ्गियुक्ता-
नारक्तान् भक्तवाञ्छाघटनसुरविटप्यङ्कुरान्संस्मरेत्तान् ॥ ४४ ॥

चक्रादीनां वर्णनम् —

कम्बुश्चक्रञ्च पाथोरुहमथ च गदा तेषु चिन्त्यानि कान्ता
कम्बुग्रीवानितम्बाननपृथुलतरोरुप्रकाण्डाकृतीनि ।
जानीमो यान्यजस्रं निजकरकमलैस्तत्तदङ्गप्रियाया-
श्चित्तासङ्गं दधानः कलयति कमलाकामुकः कामतातः ॥ ४५ ॥

चक्रवर्णनम् —

चक्रं चिन्त्यं प्रपीतामृतरससहितं लोहितं राहुकण्ठा-
त्पीत्वैवाकुण्ठितायुः स्फुरति न च जराजर्जरा यस्य धारा ।
यम्मध्यं वाहिनीनां न्यविशत शतशः स्पर्द्धमानारिवृन्द-
च्छद्मान्याच्छिद्य पद्मान्यमरजनमुदे स्राक्स्रजः स्रक्ष्यमाणम् ॥ ४६ ॥

चक्रं शक्रारिशत्रोर्विमृशतु मनसा लालसोल्लासलोलै-
र्ज्वालाजिह्वासहस्रैः प्रकटितविकटाटोपतर्षप्रकर्षम् ।
दैत्यासृक्सिन्धुसङ्घं किल कलसजनि जेतुमापीयमानै-
र्यस्यालपाप्याद्रं तानाभ्युदयति हृदये रोषशुष्मोष्मशुष्के ॥ ४७ ॥

शङ्खं तं खल्वघौघात्प्रलयघनघटागर्जितौजस्विघोषै-
र्यः कृत्वाऽनेककृत्वोऽनुसमरमसुहृद्गर्भिणभ्रूणहत्या ।
प्रायश्चित्तं विधत्ते विधिविहितमरुत्पूरणेन प्रयत्ना-
त्प्राणायामप्रयासी प्रणवगुणनिकासादरः सूक्ष्मनादैः ॥ ४८ ॥

सौरभ्यारम्यमाणर्द्धिभिरधरसुधासाधुमाधुर्यधुर्यैः
पोतैः पीताम्बरस्यास्यवनजपवनैर्निर्भरं पूर्णगर्भः ।
रुक्षासृग्वस्तरक्षोऽसुपवनपिवतापीवरों ववरों वा
कामं कौमोदकीं यो हसति स मनसा कम्बुराट् चुम्बनीयः ॥ ४९ ॥

चक्रशङ्खयोर्वर्णनम् —

चक्रं वृक्णारिचक्रं परिचरतु धिया चण्डरुङ्मण्डलाभं
कम्बुं चाडम्बरेणानिभृतममृतरुग्बिम्बसंवादकम् ।
यौ कालिन्द्योघकल्पे हरिरुचिनिचये तस्य चक्षुर्भवन्तौ
स्नेहेन स्वानुबिम्बाविति किमुभयतः पश्यतः पुष्पवन्तौ ॥ ५० ॥

ध्यातव्यं दिव्यमब्जं दितिजविजयिनो यत्सदेशस्पृशोऽब्ज-
श्री सर्वस्वच्छिदोऽदोवदनपदजुषो भीतमम्भोजराजात् ।
नित्यं निद्रादरिद्रं विसृजति मधुनो विप्रुषोऽश्रुदविन्दू-
न्बन्धुस्नेहानुबन्धात्करसरसिरुहाश्लिष्यताश्वास्यते च ॥ ५१ ॥

कञ्जं युञ्जीत चेतस्यजितकरसरोजाधिराजेन जित्वा
जीवग्राहं गृहीतं दलितमतितरां बाहुजप्रौढिभाजा ।
पुष्टाः सर्वस्वपोषं मधुरमधुभृतेरक्ष मा बन्धमोक्षे
यस्यादूरे रुदत्यो भ्रमरपरिषदः सभ्रमेण भ्रमन्ति ॥ ५२ ॥

पीत्वा मांसोपदंशं युधि रुधिरसुरां पाटचमानासुरोरः-
पट्टव्याघट्टघोषाट्टहसितविकटं क्षीवभावान्नटन्ती ।
यां प्रीतिं प्रेतभर्त्तुर्व्यधित घृतवसालेपनेपथ्यरौद्री
तस्या ध्यायेदसाध्याहितहृदयगदाभोगदाया गदायाः ॥ ५३ ॥

भ्रामन्ती दिष्टगत्याऽहितवृषपिशितं प्राश्य मातङ्गकुम्भात्
पीत्वा चाजौ मदाम्भस्तदनुशययुता या नखांशुच्छलेषु ।
स्नान्ती गङ्गाजलेषु व्रतयितुमिव तद्योषितां गोपयोऽधोक्
प्रायश्चित्तं भजन्तीं महयतु महतीं तां गदां धर्मसेतोः ॥ ५४ ॥

श्रीनारायणकण्ठस्य वर्णनम् —

सोत्कर्षं कंकणांकैः सरसिजवसतेरश्लथाश्लेषमग्नै-
र्वैकुण्ठाधीशकण्ठस्फुटदरसुषमा नादरो भावनीयः ।
यत्सौभाग्याभिभूतो निजनिकटचरः पाञ्चजन्योऽपि चिन्ता-
जन्यं शून्यान्तरत्वं प्रकटयतितरां पाण्डुभूयं च भूयः ॥ ५५ ॥

त्रय्यासंचारपद्यामिव निजवचसस्तां त्रिरेखां दधाने
सोत्कण्ठं कण्ठदेशे दिशतु किल मतिं केलिकण्ठीरवस्य ।
अध्वन्या सिन्धुकन्याहगपिरुचितया यत्र चित्रीयमाणे
चित्रायां प्राप्य यात्रामिव न हि पुनरावर्त्तते मोदमाना ॥ ५६ ॥

अर्चिर्वर्त्माध्वनीना वरवचनमयान्यद्ध्वनीनात्मनीना
नीहन्ते यं पवित्रं विरचयति जनो दीर्घं दर्श्यघंपात्रम् ।
भक्तानां भागधेयाधित उदितवतो मुक्तिमुक्ता प्रसूते-
स्तस्याद: कण्ठकम्बो: शुभविभवभुवोऽध्येतुमध्ये समाधि: ।। ५७ ।।

वैजयन्तीमाला वर्णनम् —

मोक्षश्रीं वैजयन्तीं मुनिनियममुषः षडद्विषस्तजयन्ती-
मन्त: स्वान्तं दधीतोदधिमधिशयितुर्वैजयन्तीं जयन्तीम् ।
लब्धश्रीशांगसङ्गां मधुपृषतशत स्वेदसन्दोहसान्द्रां
यां वाजव्याजसज्जव्यजनमलिवधूराजयो वीजयन्ति ।। ५८ ।।

मालावैकुण्ठकण्ठग्रहमहबहुला मोदमभ्युल्लसन्ती
रमार्य्या सिन्धो: कुमार्य्यास्तुलयितुमिव दो: सौकुमार्य्यं प्रगल्भाम् ।
यां पद्मासद्मपुष्टा: कलितकलकला: पक्षलक्षेण पाणौ-
र्वारं वारं धुवत्यो मधुपयुवतय: साहसाद्वारयन्ति ।। ५९ ।।

भूतग्रामं चतुर्द्धा विरचयतुमलं पञ्चभूतस्वरूपां
पूज्यां वर्णैश्चतुर्भि: स्थितिचतुरतरै: पञ्चवर्णात्मिकाञ्च
भेत्तुं चित्तं रमाया रतिरमणकृतां वाणसम्पूर्णतूणीं
मालां ध्यायेत्तमामुत्तमकुसुममयीमप्रमेयात्मशक्ते: ।। ६० ।।

चन्दन्मन्दस्मितेनोल्लसदधरपुटं किञ्चिदुत्फुल्लगण्डा-
भोगं भूयो विकाशोक्षणकमलयुगं सान्द्रचन्द्रद्विवाधि ।
श्वासामोदानुमादानुसरदलिगणैर्गीतनासागुणौघं
स्वालेख्यालेख्यसद्भ्रूलतमथ वदनं दानवारेर्विभाव्यम् ।। ६१ ।।

बिभ्रद्बर्हिमुखानां मुखमिति जनकस्यानुरूपं स्वरूपं
यद्भूर्ज्वालाह्वजिह्व: कवलयति हविर्जुह्वतां सप्तजिह्व: ।
विप्र: कव्यप्रियाणामपि लपनतया तृप्तये न्युप्तभोजी
न्यस्येदास्ये मनोऽस्मिन्नखिलमखभुजस्तस्य विश्वम्भरस्य ।। ६२ ।।

रुद्रेण द्रुह्यमाणः किल कुसुमशरस्तत्प्रतीकारहेतो-
रस्मादुत्पत्स्यमानः सुहृदिनिहितवान् जैत्रशस्त्राणि यत्र ।
राजीवे बन्धुजीवे दृगधरयुगले वज्रपुष्पं च नासां
पञ्चेषून् भ्रूधनुश्चार्पयतु मतिमिह श्रीमुकुन्दाननेन्दौ ॥ ६३ ॥

स्वः सोमोदेवतास्मै हविरपि हृदयं पुंस्प्रवृत्तिं सृजन्ती
संयातायातसंशाद्दलभृदभिधयाश्वासभूतिः श्रुतिश्च ।
तत्साकाङ्क्षालिमालास्वनितनुतिपरासंनिधिस्यार्थवादः
कुर्वीता दो मुखस्य स्मरणमखमतो मुक्तिकामोऽधिकारो ॥ ६४ ॥

अग्नेरग्र्यारणिं स्वाभरणमणिमहोद्दामसौदामिनीनां
राज्या नीराज्यमानं नयनपदकृतार्थीकृतार्कामृतांशु ।
आदित्यैर्दुस्तुदस्यान्तरचरतमसो ध्वंसकार्य्यायकुर्य्या-
च्चित्ते देदीप्यमानद्युतिमुखमखिलज्योतिषां भासकस्य ॥ ६५ ॥

स्वस्वान्तादेव देवो यमजनयदयं वेधसोऽकल्पशिल्पं
भक्तानुक्रोशगर्भान्मुनिजनमनसां लीनता यत्र युक्ता ।
व्यक्तं यस्यानुबिम्बा हिमकरनिकराः पूर्णिमा पूर्णविम्बा-
स्तं सेवेतामृतोयन्नमृतकरभृतं चेतसा तन्मुखाख्यम् ॥ ६६ ॥

दुग्धस्निग्धस्मिताभामिषविषदकृपोन्मेषपीयूषवर्षैः
स्वेषां हर्षं दधाने घृतमधुरपरिस्पन्दने दीनबन्धोः ।
मन्दश्वासानिलेषत्तरलकिसलय-श्रीगरिष्ठेऽधरोष्ठे
चिन्तां दन्तांशुदम्भस्फुटकुसुमरजः सुप्रतिष्ठेऽनुतिष्ठेत् ॥ ६७ ॥

आस्येन्दुस्यन्दमानामृतविततशिराद्वारचातुर्य्यंचौर्य्या-
चार्य्या स्मार्य्या चिरायारुण रुचिरुचिरा श्रीधरस्याधरश्री ।
योगादास्वाद्यमानामृतरतजननी या त्रिलोकी जनन्यो
कामं कामं दुहानाप्यहह दहति तं भाव्यतां देहबन्धात् ॥ ६८ ॥

माधुर्य्योद्रेकहृद्यं विपरिणतफलं रूपसम्पल्लतायाः
श्रीप्रेष्ठस्योष्ठविम्बं स्मरतु रुचिमदाहूतबालार्कविम्बम् ।
यन्मृष्टत्वस्य तुष्टा निजरमणभुजापञ्जरान्तः स्फुरन्ती
सोत्सेकं छेकभावं कलयति कमलाकारिका कीरकन्या ॥ ६९ ॥

राजानं या द्विजानामजमुखजतया विश्रुतातं स्वतातं
भक्त्योपास्ते च किं च स्फुरदरुणरुचं साधु सन्ध्यायमानम् ।
साधिष्ठां वर्णनिष्ठां बहति तदधरं या पुरस्कृत्य नित्यं
पूज्याराजी द्विजानां प्रणिहितमनसा स्याद्द्विजेन्द्रध्वजस्य ॥ ७० ॥

स्वच्छन्दं बन्धुरत्वं दधदधरदलद्बन्धुजीवानुबन्धा-
न्मौकुन्दं दन्तवृन्दं मुदितमुनिहृदिन्दिरं दामकौन्दम् ।
वारम्बारं विभाज्यं विभुवररसनाध्यासनौजायितायाः
पूजायै जायते यत्किल कलुषमुषः शारदादेवतायाः ॥ ७१ ॥

पङ्क्ति द्वैधानुबन्धि श्रुतियुवतिशिरश्चारुसीमन्तसीमा-
प्रव्यक्तामुक्तमुक्तागुणगुणनिपुणाश्चित्तमारोपणीयाः ।
वेदान्तार्थस्य दन्ताधवलिमवलिनः सान्द्रसिन्दूरधारा-
सौन्दर्य्यं धारयन्त्यारभत यदभितः सौष्ठवं सौष्ठलेखा ॥ ७२ ॥

ध्यायेद्घोणां घृणाब्धेस्तिलकुसुमतुलासज्जयाप्यर्जयन्ती-
माकृत्यामोदमुच्चैः सकलसुमनसामुत्तमामोदकामा ।
यातायातैर्यदीयाः श्वसितसततगा द्वारि धारालरोला
रोलम्बाद्यर्थिसार्थाननिशमुपगतांस्तादृशांस्तोषयन्ति ॥ ७३ ॥

सर्वेशघ्राणवंशं समभिनिविशतां ब्रह्मधामारुरुक्षो-
रुच्चैर्निःश्रेणिमग्र्यां यमपि च सुषमा नाम शैलुषयोषा ।
अध्यारुढा गुणैरुच्छ्रितमतिविततैर्बिभ्रती विभ्रमर्द्धि
लोकस्यालोकगृध्नोरपहरति चिरोपार्जितां पूर्वलक्ष्मीम् ॥ ७४ ॥

नस्यैरुद्यत्कषायैः कषितुमिव जगत्प्राणरूपैरुपायैः
पुंसां दोषत्रिकोद्यद् भवगदविपदं योगतोऽन्तर्विशन्तीम् ।
नासां नासत्यरूपाममृतकरतया विश्रुतामाश्रयेत्तां
श्रीसंज्ञा सैन्धवी बह्वमनुत चकिताधिश्रियं यत्प्रसूताम् ॥ ७५ ॥

अभ्यर्णे कर्णयोः किं स्खलितमलिभरान्नुत्तमुत्तंसपद्म-
द्वन्द्वं भ्राम्यन्मिलिन्दभ्रमकरतरलश्यामलस्निग्धतारे ।
दैत्यौघेऽधर्मधर्माविधिविधिविरुधि क्रुद्धवच्छोणकोणे
त्रैलोक्यत्रातुनेत्रे बहिरनबहितस्वान्तमन्तर्विलोके ॥ ७६ ॥

विष्णोरक्ष्णोरभीक्ष्णं स्मरतु सुमधुराः प्रोच्छलत्प्रेमधारा
व्यात्युक्षी केलयोऽनुक्षणसुभगतम श्रीकटाक्षच्छटाभिः ।
याभ्यां नातिस्वदन्ते भवदवविधुरान् मूर्च्छितात्मोयसेकं
सिञ्चन्त्यां भक्तलोकान् स्फुरदुरुकरुणाशीतवीक्षाभिरद्भिः ॥ ७७ ॥

वक्त्रेन्द्राविन्दिरायाः शिथिलरसमिव ब्रह्मशर्वाविकाण्डे
कुर्वद्दौर्भाग्यदुःस्थावितरसुरगणप्रेक्षणेऽघं भविष्णु ।
एकौरस्याधिकेष्ठान् शुकसनकमुखान् द्रष्टुसमर्द्द नष्टा-
नन्वेष्टुं तातचारं चरदभिककुभं चक्रिचक्षुर्विचिन्त्यम् ॥ ७८ ॥

वृन्दैरिन्दीवराणां जलजवरयुजां स्वस्वपादप्रसादा-
त्कादाचित्कीं श्रयद्भिः श्रियमनिशशुभा दुर्लभायस्य शोभा ।
साक्षाल्लक्ष्म्या यदीक्षा समुदयतिमुदे ब्रह्मणापीक्ष्यमाणा[1]
चेतस्यालोचनीयं नयनयुगमदः पुष्पवल्लोचनस्य ॥ ७९ ॥

आकीर्णैर्कर्णिकाग्रोचितखचितलसत्पद्मरागांशुजालै-
र्लाक्षालिप्तेन्द्रनीलस्थलकलिकुपितौ तौ कृपालोः कपोलौ ।
ध्येयौ ताम्बूलपङ्कैः शबलित वपुषौ चुम्बनाडम्बरोत्थै-
र्मत्वा यौ लांछनं प्रोञ्छितुमुदितह्रियौ व्याप्रियेते प्रिये ते ॥ ८० ॥

१। घ्रातापातं

संसृष्टे भूतिजुष्टैश्चलकरनिकरैः कुण्डलोद्यन्मणीनां
यच्छेदच्छेऽस्य गण्डस्थलमुकुरतले मानसं संमुखीने ।
चित्रं यत्राभिमुख्ये प्रसरति परमानन्दसन्दोहसान्द्रं
योगीन्द्रास्ते स्वरूपं किमपि विरहिताकारमालोकयन्ति ॥ ८१ ॥

स्निग्धश्यामामलेन्द्रोपलविपुलतरादर्शदृश्यं क्षतारि-
व्राताटोपं कपोलस्थलफलकयुगं धर्मपालस्य धार्य्यम् ।
सद्यः प्रच्छाद्य गात्रे स्थितिचतुरतया यत्र धर्मो सकामा-
कामो भ्रूखड्गलेखे खलु मिलितशिखे युध्यमानो दधाते ॥ ८२ ॥

यत्सत्यं सत्यवद्य व्यवसितिविदिताख्यैकसख्यात्स्वकीया-
द्यां सर्वाशासवित्रीं श्रुतिरुदितवती विश्वविश्वासपात्रम् ।
भक्तच्छापूर्त्तिकर्मिच्छिकनियमवशाद्यत्र कर्णाप्रसिद्धिः
शुश्रूषेत श्रियाढ्यां हृदि मृदितमले तां श्रुतिं श्रीप्रियस्य ॥ ८३ ॥

अन्तः संयन्तुकामेन्द्रियगणगजतायूथनाथं मदर्द्धे-
रुह्यमानं मनोनामकमृषि जनता यावपाशाद्व्रियेत ।
याम्यां बद्धात्मनां न प्रभवति भवजो दुस्त्यजोऽप्यस्तजन्मा
भूयो बद्धस्यबन्धोऽक्षजित इव हरेस्तौ स्मरेच्छ्रोत्रपाशौ ॥ ८४ ॥

योगाध्वप्रोढतृष्णस्त्रुटितगुणघटो जुष्टतीर्थोऽमृतार्थी
धर्मद्धर्यं कूपकर्त्तुर्विशतु दृढपदं कर्णकूपे कृपालोः ।
यद्भूषाश्मांशुपूरं निजनिकटचरं दर्शिताहावभावं
दिव्यर्षीणां दिदृक्षाभरपरितृषिताः पश्य धावन्ति गावः ॥ ८५ ॥

त्रैस्तौ वैधुन्तुदारुन्तुदरदकदनात्स्वाभयं याचमानौ ।
ये ननं वेपमानावुडुपतितपनौ कर्णजाहं जिहानौ
प्रीत्या प्रत्युद्गतौ चायतनयनयुगेनात्ममूर्त्यन्तरत्वात्
ध्यायेदाहु द्रुहस्ते रुचिभररुचिरे कुण्डले गण्डलोले ॥ ८६ ॥

स्थाप्य: संकल्पतल्पे मणिमकरमुखाकारशिल्पोऽस्य कर्णा-
कल्पोऽम्भोयन्त्रकल्प: कलयत सुधियोऽनल्परत्नांशुवेश: ।
त्रैलोक्यावासयोग्यामपि विपुलवपुर्वापिकां पूरयित्वा
धावल्लावण्यपूर: परिबहति बहि: साध्वनेनाध्वनेति ॥ ८७ ॥

द्रुह्यन्तौ मह्यमस्य श्रवणमलभुवौ भाविनौ दानवौ तौ
निद्रागन्तुर्युगान्ते द्रुहिण हृदि समुत्त्रासमुत्थास्नुमित्थम् ।
साक्षात्प्रक्षालयन्त्यावपि मणिकिरणैर्निर्मलं निर्मिमाणे
कर्णान्त: कर्णभूषे प्रतिभवभिषज: प्रोढचेतीवुभूषेत् ॥ ८८ ॥

धीशैलूषीं विशाले सममसृणतले दीपिते दीपिकाभि:
कैरिटश्मछटाभिर्नटयतु निटिलोत्सङ्गरङ्गे त्रिमूर्त्ते: ।
यत्र त्रैलोचनं लोचनमनलमयं बाधमानस्य दासां-
स्त्रासार्थं शर्वशत्रोस्तुलयति तिलको निस्तलो रोचनाया: ॥ ८९ ॥

वक्त्राब्जासङ्गभृङ्गी भवदलककुलाकारकालाक्षराणां
विभ्राणां धारणीं हृद्भुवि भुवनगुरोर्भावयेद्भालपट्टीम् ।
अभ्यस्यन्तीव यस्यां पटुमुनिवटवोऽध्येतुमध्यात्मविद्यां
श्रद्धाबद्धावधाना अपरिचितचरीं मातृकां कामपीमाम् ॥ ९० ॥

कोटीराबद्धनानाविधमणिकिरणैरुल्वणालेख्यलक्ष्मी:
श्रीमत्तुर्भालभित्ति: स्वलवणिमसुधास्निग्धमूर्त्तिर्विभाव्या ।
प्रत्याहारोपवासाद्दनुदनुजरिपुध्यानपीयूषयूषै-
स्तन्द्रालु: पारयित्वा श्रयति यतिमतिर्यामुपध्नो चिराय ॥ ९१ ॥

त्रातुं तास्त्रयार्त्तान्स्ववरणशरणान् छाययोच्छ्रायभाजा
कारुण्योर्दार्चिकिंचिच्चलितललितया संक्षयाश्वासयन्तीम् ।
आम्नायस्वद्रुमाणां स्थगितशिखमुपस्कुर्वतीं तां त्रिधाम्नो-
भ्रूनाम्नीं कल्पवल्लीं विपुलबहुफलां पालयेच्चित्तसीम्नि ॥ ९२ ॥

स्मर्त्तव्यः सादरं स्वे मुकुटपरिसरे स्थापितः शार्ङ्गिणापि
भ्रूचापो रूपदर्पाद्रतिपतिभृशतां मन्यमानस्तृणाय ।
संहर्त्तुं वैरिणः षण्मुनिहृदि गुणिनं योगतः प्रस्फुरन्तं
यं पश्यन्पुष्पचापोऽपसरति चपलं ह्रीभयन्यस्तशस्त्रः ॥ ९३ ॥

संयोक्तुं योगिभोगिद्वयमपि युगपद्भुक्तिमुक्त्यङ्गनाभ्या-
मिष्वभ्यासार्थसज्जीकृतवितनुधनुर्युग्मकार्य्योद्यतेन ।
प्रत्याक्रष्टुं यथेष्टं विषयवनजुषं चित्तमत्तेभमिष्टं
चेष्टेत ध्यानशाणामसृणसृणियुजा त्वं युगभ्रूयुगेन ॥ ९४ ॥

सान्द्रैरुद्भासिहासान्सुरतरुकुसुमैरिन्द्रनीलाधिनीला-
नन्तः प्राप्तप्रकाशान् रचयतु रुचिरान् श्रीहृषीकेशकेशान् ।
सार्द्धं स्पर्द्धानुबन्धादिव समुदयते व्योमकेशस्य केशै-
र्येषामभ्रान्तशुभ्रोड्डनिवहनिविडाकाशनीकाशभावः ॥ ९५ ॥

हस्तीन्द्रस्यार्त्तिसिन्धूद्धरणमभितताभीतिहस्तस्य दूरा-
दार्त्तत्राणस्य दूरप्रसृमरमहिमा केशहस्तो विचिन्त्यः ।
यं हस्तीकृत्य भक्त्या भवदवदहनज्वालजालैर्विहस्ताः
कुर्वन्ति स्वान्तदूरामपि दुरधिगमां हस्तसान्मोक्षलक्ष्मीम् ॥ ९६ ॥

कौटिल्यं दुष्टलोके किल सुजनजने मार्दवं वर्षुकाब्दो-
त्कर्षं क्लेशाभितप्ते विभजदिव विभोः कैश्यमन्तर्विमृश्यम् ।
किं नाधिस्निग्धतायास्तदुचितमुदितं मोचयेद् यत्स्वबन्धून्
भक्तान्संसारबन्धात्स्वयमपि सततं बन्धमङ्गीकरोति ॥ ९७ ॥

शुभ्रं रभ्रं लिहैरुन्मुखमणिकिरणैर्ब्रह्मरन्ध्रोपरिष्टा-
दर्चिर्मार्गं सुदुर्गं निजभजनमृते दर्शयद्भक्तपान्थान् ।
पश्य त्वं पश्यन्निमेषं मणिमयनयनैर्विस्मयेनास्य सृष्टिं
स्मर्त्तव्यं प्रत्नपुंसः स्फुटरुचिमुकुटं कूटवद्रत्नसानोः ॥ ९८ ॥

रत्नौघोद्यत्कराग्रैर्मुखमभिककुभां पत्रलेखालिखन्तं
बध्नन्तं सान्द्रचन्द्रातपततिमभितो भक्तमुक्त्युत्सवाय ।
अग्रीयोदग्रभावाद्गगनतरुशिरः स्मेरताराप्रसूना-
न्युच्चान्युच्चेतुकामं किमु हृदि कुरुतां कैटभारेः किरीटम् ॥ ९९ ॥

योगीन्द्राणां द्विष षड्विषधरविषमानिच्छतां रोद्धुमद्धा
बध्नौघोत्थैर्मघोनो धनुभिरगणितैश्चित्तमुद्यद्गुणैश्च ।
निर्वाणीभूय भूयः सफलयति मतिं यो भयाभावमूलं
नश्यद्दोषां विभूषां महयतु महितां मौलिमाम्नायमौलेः ॥ १०० ॥

॥ इति श्रीनारायणशतकं सम्पूर्णम् ॥

श्रीनृसिंहशतकम्

श्रीनृसिंहशतकम्

चण्डब्रह्माण्डभाण्डभ्रमणभरबृहद्घोषनिर्घातदैर्घ्यै-
र्दुर्दैत्यव्याघ्रशीघ्रप्रमथनकथनं सर्वदिक्षु प्रकुर्वन् ।
कौटिल्यक्रूरदंष्ट्रोत्कटचटुलनटप्रह्वजिह्वामहोग्याः
प्रह्लादाह्लादहेतुर्दहतु मम महद्रंहसांहो नृसिंहः ॥ १ ॥

नैष्ठुर्य्योर्जस्विचण्डत्रिदशगिरिमहादण्डसंताड्यमान-
ब्रह्माण्डातोद्यभाण्डोड्डमररवसुहृद्भावसंभावनीयः ।
रुष्टेन्द्रद्वेष्टृमुष्टिद्घणहतसभामण्डपस्तम्भगर्भा-
दाविर्भूतो विभूत्यै भवतु नरहरेरादिघोषो विशेषात् ॥ २ ॥

देवद्वेष्टप्रवेष्टोद्भटमदविटपिभ्रंशघोषातिघोरो
दैत्येन्द्रश्रोप्रकोष्ठोत्कटकटकघटाकूजकूटायमानः ।
निर्घोषोद्घटं द्रागघटयतु विकटप्रेतराड्द्वाः कवाटो-
द्घाटाट्टध्वानकल्पः प्रकटकटकटाकाटवोत्पाटवोऽसौ ॥ ३ ॥

अंहस्संघातघातं घटयतु निनदो रंहसा नारसिंहः
स्वर्गस्त्रीवर्गरङ्गस्थलपदकलनानन्दिनान्दीनिनादः ।
दैत्येन्द्रापत्यतत्युत्तममहिमभरोद्दामसौभाग्यभेरी
भाङ्कारो दिग्द्विदन्तश्रुतिचलनकलाध्यायसन्ध्याब्दशब्दः ॥ ४ ॥

ऊर्मिप्रेङ्खोन खेला मुखरजलनिधिध्वानगानातिपीनः
क्रोधक्रूरस्य शक्रद्विषि हरिवपुषश्चक्रपाणेः प्रघोषः ।
कल्याणं लोकपाल्या विरचयतु हरि कुञ्जरश्रोत्रपाल्या-
वाल्य प्रावल्यशाल्याशुगविकृतिहृतेः श्लाघितोदानपाल्या ॥ ५ ॥

सम्वर्त्तारम्भशुम्भज्जलदकुलगलस्तम्भिगम्भीरताभृ-
न्मन्थाद्रिक्षुब्धदुग्धाब्धिजनिनदविधाजग्धिर्वैदग्ध्यदिग्धः ।
संभूत्योज्जृम्भमाणे सुघटघनघृणो दीर्घनिर्घातवर्गे
शीघ्रं निर्घोष एष स्फुरतु हृदि बृहद्घर्घराघोर ऐशः ॥ ६ ॥

मोहं सौवर्गवर्गे महति बहलयन् द्राङ्महर्गेहभाजां
निष्पीतश्रौतगीतोऽनुसनकजनक श्रोत्रवाधिर्यधुर्यः ।
दिक्कुम्भिस्तम्भकारो प्रतिनिनदसमुत्तालपातालतालु-
श्चण्डो ब्रह्माण्डभेदो भवतु हरिरव श्रेयसे भूयसेवः ॥ ७ ॥

ऊर्ध्वं प्रोद्धृतधूमध्वजनयनऋजुज्वालमाणिक्यदण्डं
नीलप्रालम्बलोल प्रचलितरसनाराजि विभ्राजिबिम्बम् ।
दीव्यद्दर्वीकरोर्वीपतिविततफणश्रेणीनिर्माणमन्त-
र्निर्मायं भावयामः प्रभुशिरसि बृहच्छत्रमुत्तापहत्यै ॥ ८ ॥

क्षोणीभृत्पक्षपातादनु नृहरितनुक्षिप्यमाणैर्विपक्षै-
र्बाणैर्वैमुख्यलक्ष्यैः श्वसितपवनतः क्षुण्णतत्कण्ठलक्षः ।
उद्दण्डैर्मण्डलाग्रैरपि चरमचरे खण्डनायारिषण्डे
लाङ्गूलो चण्डदण्डं दधदवतु विपन्मण्डलाकुण्डलीन्द्रः ॥ ९ ॥

उद्दण्डैर्ज्वालिषण्डैर्ज्वलदनलदृशोऽजाण्डदण्डोर्द्धिखण्ड-
स्फोटोभावीति भीत्या प्रथितपृथुफणश्रेणिविस्तारणश्रीः ।
उर्वीबाहोर्वनेकार्बुदकुलकलनामौलिनिष्ठे प्रतिष्ठः
शीघ्रं नो दीर्घपृष्ठप्रभुरभयभृतो भूषणं भावनीयः ॥ १० ॥

अग्रप्रोदग्रजाग्रन्मणिगणकिरणैस्तारकोन्मेषचौरं,
नीचैरुच्चैरुदञ्चद्विततपृथुफणश्रेणिशाखासहस्रम् ।
लग्नैरग्निस्फुलिङ्गैः स्फुटरुचि निटिलाक्ष्णोऽप्यभीक्ष्णं तथाधः
क्रुष्टाकष्टानिदृष्टं पणिपतिमुकुटं कूटसिंहोपरिष्टात् ॥ ११ ॥

सोमस्पर्शात्प्रकर्षं प्रवहति दधती यक्षिणी चित्रलक्ष्मीं
यत्राभाते यदन्तर्विलसति सततं गुह्यकेशप्रसारः।
गङ्गाम्भः शुभ्रमभ्रंकषशिखिशिखरभ्राजितं राजताद्रे-
र्देवस्योपर्यहीनोर्जितफणपटलं पाटयेत्संकटं नः॥ १२॥

पायादाकाशकाशोज्वलकुसुमसमज्योतिरुज्जृम्भिताग्रा
प्रत्यग्रप्रग्रथ मुक्ताफलखचित शिखस्वर्णसूची सखी नः।
क्षुद्रछिद्रालिमुद्राविधुपरिधिवलच्चालनी शालिनोति-
र्लीलापारीन्द्रमूर्त्तेरतिपरुषरुषद्रासुरा केसराली॥ १३॥

वैकुण्ठोत्कण्ठितानामणिमगुणजुषां प्राणिनां प्रीतिभाजां
गात्रादुत्क्रान्तिमात्रे सुखमयनिलयप्रापणायापयत्नम्।
ब्रह्माण्डस्योद्ध्वखण्डेऽरचिषतसृतयो निःसृतैर्यैविदार्य-
स्थैर्यं हर्यक्षमूर्त्तेर्निदधतु हृदि ते केसरा भासुरा नः॥ १४॥

हृत्कुण्डान्तः प्रचण्डप्रतिथहुतवहश्रीशिरोरोमकूप-
स्तूपद्वारोद्यदंशुस्तवक इति जने विभ्रतो भ्रान्तिमुच्चैः।
विद्युज्ज्वालावनीव प्रतिभयरसनाच्छिन्नचाञ्चल्यसम्प-
ल्लुम्पे प्रत्यूहमत्यूर्जितमिहनृहरेर्भासुरा केसरालिः॥ १५॥

यैरासीद्दैत्यहत्याहृषितहृदमरश्रेणिपूजावितीर्ण
प्रोन्मीलन्मल्लिपुष्पस्तवकितशिखरस्वर्णदूर्वासवर्णः।
विद्युल्लेखासदक्षैर्नरहरिशिरसि स्युतनक्षत्रलक्षै-
र्लक्ष्मीरक्षीणभावं विदधतु वृजिनोज्जासने केशरास्ते॥ १६॥

स्वीयश्रीलेशचौरोऽशिचरमचिररुचः स्वोदरोदारदर्यां
पर्याप्तीकृत्य गोत्रि नभसि घनघटां कोटिकुन्तच्छटाभिः।
निर्यत्कीलालकुल्यं किलपरुषरुषा पाटयन्तीव चेतो
दैत्योरः पाटनाटी कपटहरिसटाधाटिका टीकतां नः॥ १७॥

सप्तार्च्चिर्भित्रसूत्रत्रुटनसुरसृति भ्रस्तनक्षत्रमाला
मल्लीजालाभिसृष्टिद्विगुणितसुमनः सृष्टिसत्तानवृष्टिः ।
सन्ध्यासम्बन्धशोणाम्बुदपटलपटोपाटनक्षेपलक्ष्मी
रज्यत्काष्ठावघूटीकपटहरिसटाधाटिका भूतिरव्यात् ॥ १८ ॥

स्वःसिन्धाकल्पाब्धनल्पोच्छलदुरुलहरीघोषकल्पादसीय
ध्यानादव्यक्तभक्तस्तुतिपदसदय ग्राहिका साग्रहेव ।
रीत्या सा जात्यभाज्यामतिपरुषारुषमिन्द्रियाणां चतुर्णां
संकोचं लज्जयेवोर्जितमघिदधति पातु कर्णद्वयो नः ॥ १९ ॥

द्रष्टृणां दृष्टिसृष्टेरुपरिकृतभयाविष्टताबृष्टिरुष्टे-
न्द्रद्वेष्टृक्लिष्टजुष्टस्मरणनिजजनानिष्टमुष्टिन्धयं तत् ।
लीलाशैलाटमूर्त्तेरतिपरुषरुषोद्घाटयत्पाटलश्री
घाटं विष्णोर्ललाटस्थलमतिविकट पाटयेत्संकटं नः ॥ २० ॥

नृत्यत्कृत्यावलीव प्रलयसमुदयत्कालरात्रीव खेल-
च्चामुण्डामण्डलीवाट्टहसितविकटोत्तालवेतालिकेव ।
उद्रिङ्गद्रौद्रलक्ष्मीरिव किमुत बृहद्भैरवोहासिगर्भा-
भ्रश्यत्स्वर्भानुवर्गा ध्रुवमवतु विभोर्भीषिणा भालभित्तिः ॥ २१ ॥

उद्यन्निद्धूमधूमध्वजमयनयनाङ्गार धाम्याश्रितासौ
तत्तिर्यङ्गियर्दर्च्चिर्निचयपरिचयेनेव रक्तावसिक्ता ।
साचिव्यक्तत्रिरेखावलिवलयवतो भूतकालाग्निरुद्रे
वेदानीमेव देवप्रवर तव हरे पातु भालस्थलो नः ॥ २२ ॥

नृत्यन्ति कालरात्रिकरतलविचलसाचिशूलानुकूला
मुद्राविद्राविरौद्राम्बुनिधिमर्धवलल्लोलकल्लोललीलाम् ।
विभ्रत्येतन्मुखान्तः समुपगतमहाकोपसोपानपालि-
र्गोपायेन्नस्त्रिरेखो निटिलसहचरो चित्रपारीन्द्रमूर्त्तेः ॥ २३ ॥

गाङ्गेयाभिख्यया यज्जयति यदुदितं शान्तनुस्फारमोदे
पार्थेनायोधनश्रीरपि यदधियये चोद्ध्वंतेजः प्रसिद्धिः ।
यस्यास्तेकृष्णवर्त्मानुसृतिपरमहो भारताराति दाहि
भ्रूवल्लीमध्यनेत्रं नरहरिवपुषो नौमि भीष्मस्वरूपम् ॥ २४ ॥

ऋक्षाभिख्यां विवस्वद्रथचरणरयक्षुण्णऋक्षेऽन्तरीक्षे
स्फारं स्फारं स्फुरद्भिर्विदधति बहलैरुत्पतद्भिः स्फुलिङ्गैः ।
ऋक्षश्रेणीसदृक्षे क्षिपति दिशि दिशि ध्वान्तजाले शिखोल्का-
मालालालाटनेत्रे विहरतु नृहरेस्तत्र चित्रे मतिर्नः ॥ २५ ॥

हृष्टान् वृष्टप्रसूनान्नभसि दिविषदोनूत्नरत्नप्रसूनैः
स्फूर्जत्फुल्लस्फुलिङ्गैः सुहृदि हिमहिमैर्ज्वालहस्तैरुदस्तैः ।
शीघ्रं प्रत्यर्थदीर्घीकरणबहुगुणे मज्जयल्लज्जिताब्धौ
नेत्रं सद्वीतिहोत्रं दहतु नरहरे रंहसांहस्तृतानि ॥ २६ ॥

वेल्लज्जित्वोल्वणेन प्रचलितबहलज्वालजिह्वासहस्रं
स्फारस्फूर्जत्स्फुलिङ्गस्फुटमणिपटलं प्रांशुरत्नांशुभासा ।
सार्द्धं मूर्द्धोर्द्ध्वसिद्धस्थलवसतिजुषाभोगिमूर्द्धाभिषिक्ते-
नावद्धस्पर्द्धमद्धावतु हरिनयनं भालभद्रासनेद्धम् ॥ २७ ॥

लोके वारप्रवृत्तिः समुदयति यतः सन्नराजीवचिन्ते
विभ्राणश्चक्रबन्धुकरणकुतुकितां यो निशाशेषभातः ।
नित्यं धत्ते सदृक्षोदयमनुविनतानन्दनोल्लासधारी
स श्रीपारीन्द्रमूर्त्तेरपहरतु तमो भालदृग्वालहेलिः ॥ २८ ॥

चूलापातालपालोल्वणमणिकिरणाकर्षणो रञ्चितैत-
त्स्फूर्जत्फुत्कारसंकोचितविततशिखापाणिरम्यासभाग्याम् ।
सार्द्धं दृग्भ्यां सखीभ्यामिव कुतुकवशादंशुपांशु प्रपञ्चे
रञ्चन्त्यन्योन्यखेलां जयति नरहरेर्भालदृग्वालिकेयम् ॥ २९ ॥

खद्योतद्योतलेशो दिन इव नदरद्योततेर्वैद्युतोऽग्नि-
र्यस्याग्रे नोग्रभावाग्रहमपि बहते स ग्रहग्रामणीश्च ।
औवोंदुर्वाददुर्वासित इव विगलद्गर्वमम्भोधिगर्भे
लीनो यद्भेति हीनो विहरतु नृहरेस्तन्नेत्रं मतिर्नः ॥ ३० ॥

यन्मित्रो वीतिहोत्रोऽप्यतिशयदहनाध्यायमद्यापि तौ तौ
शक्तौ सम्यग्ग्रहितुं न किमपि निविडोत्ताडितावंशुवेत्रैः ।
एको रक्तावसेकादरुण इति गतः ख्यातिमन्योऽपि धाम्ना
दुःखाद्देवस्य तेजो गुरुनिटिलतटीलोचनं मोचयेन्नः ॥ ३१ ॥

लक्ष्मीवक्षोजकुम्भस्थलकृतललितालीकवाह्लिकलेपः
प्रह्वप्रह्लादमौलावतुलवलयिनी शोणशाटी यदर्च्चिः ।
रुष्टेन्द्रद्वेष्टृसृष्टेरुपरि निपतिता पावकास्तस्य वृष्टि
दृष्टिर्लालाटकीनः कपटहरितनोः पाटयेत्संकटं सा ॥ ३२ ॥

मञ्जिष्ठामञ्जुचेलव्यजनमिव वलत्तन्तुजालं समन्ता-
दास्यान्तर्लास्यवत्याः श्रमशमनकरं रोषलक्ष्मी युवत्याः ।
घोणादण्डोपरिष्टात्प्रकटितमरुतांश्लिष्टशोणांशुवेष्टं
वृत्तं हृत्तानुदत्ता वलदलनतनोरक्षिसन्तापमन्तः ॥ ३३ ॥

उद्वेल्लज्वालवल्लीच्छलमृदुलचलच्छोणचेलाञ्चलश्रीः
स्फारैः फुल्लैः स्फुलिङ्गैः खलुखचितशिखामन्दमन्दारवृन्दैः ।
स्वध्यातॄणां नृणां साभयवरकरताकीर्त्तिता सिंहमूर्त्ते-
र्बन्धूकच्छायबन्धुच्छविरवतु विभोर्वैरवीमालदृष्टिः ॥ ३४ ॥

माद्यद्युर्दानवोद्यन्मददलनफलं भक्त भूयो विपत्ति
प्रत्यादेशं फलं चाकलयितुमसुरश्रेष्ठनिष्ठाफलं च ।
कोपश्रीपाटलायाः कपटनृहरिहृद्भ्राजमानोद्भवायाः
फुल्लत्फुल्लत्रयी वोल्लसतुमदशुभस्यापनेत्री त्रिनेत्री ॥ ३५ ॥

मायागन्धं निरुन्धन्नुबिपदकमलाभोगसंपादहेतुः
सम्वादीतापदाने परमहिमकरेणान्तकारुण्य सम्पत् ।
यत्पातः शत्रुजाते सुहृदि च सदृशो दिव्यपारिन्द्रमूर्त्ते-
र्जैत्रो सा नस्त्रिनेत्रो भवभयविभवस्यापनेत्री भवित्री ॥ ३६ ॥

ज्वालावल्लीविशाला स्फुरति नरहरेर्भालनेत्रालवाले
तामेवोच्चैः स्फुलिङ्गस्फुटकुसुमघटां कोटिवेशे दधाना ।
अद्धायद्धेतुकोच्चावचफलपटलप्रायतामायताल
सम्वर्त्तोद्वृत्तवह्नि द्युमणिगणवृहद्भानुदम्भोलिवर्गः ॥ ३७ ॥

सार्द्धं योद्धुं समृद्धैर्नभसि भपतिना दुर्जयैर्द्धर्वान्तयोधै-
र्द्धृष्णिश्रेणीभटानामहमहमिकया सत्वरोदित्वराणाम् ।
वाहा संघट्टपिष्टाङ्गदमणिपटलो पांशुपिष्टातदृष्टाः
कष्टानां सन्तु नष्टयै नरहरिवपुषोभालदृष्टेः स्फुलिङ्गाः ॥ ३८ ॥

भक्तप्राणिप्रहाणिप्रचलदसिलतापाणिदुर्दैत्यहत्या-
तिक्रूरक्रोधयोधप्रचलनखचित श्मश्रुलेखासखो नः ।
रौद्र श्रीकाद्रवेयी द्रुतललनवलज्जिह्विका प्रोज्जिहाना
सा नागद्वेषिमूर्त्तेर्विहरतु हृदये वेल्लिता चिल्लिवल्ली ॥ ३९ ॥

लास्येनोल्लास्यमाना निरवधिविगलद्रोघगोधिप्रतोली
धावक्रोधाविकर्णाञ्चलचपलचलच्चामरोड्डामरश्रीः ।
घोणादण्डाग्रजाग्रज्जयपरिचयकृद्धैजयन्ती जयन्ती
रौद्रस्यद्रागभद्रं विघटयतु जगद्भ्रूद्वयी नृहिपारेः ॥ ४० ॥

दुर्दान्तस्वान्तभेकप्रतिभयसरयश्वासफुत्कारघोरा
प्रेङ्खोलश्मश्रुलेखाच्छलचलरसनाद्वन्द्वविभ्राजमाना ।
वेष्टुं वालम्वमानाननविलनिलयं भालभित्तेरधस्ता-
त्स्याद्घोणा दीर्घपृष्ठी मदघविघटनीकूटसैलाटमूर्त्तेः ॥ ४१ ॥

सूर्यादिज्योतिरुजं स्वलकरपटलीमोटनालम्पटोऽसौ
दैत्येन्द्रोद्दामधामद्युमणिघृणिघटालङ्घनेनाभिधातो ।
लोकालोकाद्रिरीत्युत्प्रतिघ इव तदुत्तुङ्गशृङ्गत्वभङ्गे
जङ्घालोजङ्घनीतुच्छलहरिपरुषश्वासवातोऽघसंघान् ॥ ४२ ॥

क्रूरक्रोवाग्निकील क्वथित इव पृथुश्वासभूमानृसिंह-
स्योग्राणामग्रगाणामनुतनुघटितस्फारविस्फोटकोटिः ।
वार्द्धीनामैक्यमृद्धं घटयितुमिव जङ्घालजङ्घालताभृ-
द्द्रागंहः संघनातीर्मम सकलशुभोल्लङ्घनीजङ्घनोतु ॥ ४३ ॥

द्वीपान्तर्वर्तिमानक्षितिधरनिकरक्षुद्रतामुद्रितोजा
लोकालोकाद्रिमूर्द्धाञ्चलचलनघनश्लाघनीयावदानः ।
द्रागभीत्याघातजातप्रतिघुरितरयभ्रान्तगाङ्गेयगेण्डु
भ्राजद्ब्रह्माण्डभाण्डः स्फुरतु हृदि हरेः श्वासरूपी नभस्वान् ॥ ४४ ॥

घोणाश्वभ्रोरुगर्भादतिपरुषखरश्वासधारा निरस्ता
कालव्यालद्वयीवोद्यतफणयुगलो श्रोत्रगर्त्तप्रदेशे ।
नेत्रायुर्वायुपायिन्यसुरपरिषदः स्थूलतालालितान्ता
स्मेराश्मश्रुद्वयीनोद्वीपदलनतनोस्तुङ्गतासङ्गताव्यात् ॥ ४५ ॥

कौटिल्येनैव खल्वाचरितपरिचितावक्रताशुभ्रताभ्यां
न्यस्यन्ती क्षीरकण्ठद्विजनृपतिघटाकण्ठपीठे प्रकोष्ठम् ।
ताभ्यां तीग्मत्वयुग्म्यां नगरवरवधूनेत्रकोणान्तमैत्री
दंष्ट्राघाटीस्फुटानः कपटहरितनोः पाटयेत्पापकूटम् ॥ ४६ ॥

आविर्भूयास्यगर्भादवमसुरवधूगर्भविभ्रंशभीमं
जिह्वां चालोक्यदैत्यक्षतजरसझरीग्रासलोलामिवोग्राम् ।
क्रूरास्थिग्रन्थकोटीविघटनकटुतोद्घाटनीवाति घोरा
पायाच्छैलाटचेष्टानुकृतिकृतिभृतो दन्तघाटीप्रभोर्नः ॥ ४७ ॥

प्रह्लादोद्रिक्तनिद्रप्रमदकुमुदिनो जागरारागराजो
दृष्टेन्द्रद्विष्टदृष्टिस्फुटपुटकघटादर्शिताक्षुद्रनिद्राः ।
विध्वस्तातिप्रशस्तामरनिवहमहासाध्वसध्वान्तधारा
कोलाशैलाटमूर्तेर्दशनशशिकलाश्रेणयः प्रीणयन्तु ॥ ४८ ॥

दैत्योरःपीठपाटप्रकटविकटरुट्कक्खठोद्घृष्टदंष्ट्रा-
संघट्टस्पष्टदृष्टज्वलनकणगणश्रेणयोऽनिष्टनष्टौ ।
जायन्तां जागरूका विदलितदनुजव्यूहवाहोर्जि तेजः
पूगप्रोद्गीर्णचूर्णप्रचयसमरुचोरंहसा सिंहमूर्तेः ॥ ४९ ॥

निर्यल्लालाटदृष्टिज्वलनघृणिघटाप्लुष्टदुष्टौघवंश
स्थूलास्थिग्रन्थिकूटस्फुटनचटचटाट्टारवस्फारशङ्काम् ।
कुर्वन् गीर्वाणवर्गेऽद्भुतकलननभो भाजिनिःशेषयेन्नो
दोषान् रोषप्रपोषोर्मिषहरिवपुषोदन्तसंघट्टघोषः ॥ ५० ॥

मन्दारोन्दारसिन्दूरकशिशुविसिनीबन्धुबन्धुकसन्ध्या
निर्यन्निर्यासकार्याकृतिरिवकलितारुण्यतारुण्यसंपत् ।
सप्तार्चिस्तप्तखड्गप्रतिनिधिरघकोल्लासिलौल्योल्वणश्री-
रास्तां नस्तापभाजां नरहरिरसनावासनाशासनाय ॥ ५१ ॥

सौक्ष्मेणाग्नेर्निदाने वदन इह सतः क्रोधदोधूयमानः
प्राणद्राघिष्ठभस्त्राजवनपवनतो दीप्तिशीलेवकीला ।
क्रोधान्धानां नखानामसुरवरहृदो दर्शनायेव सम्यक्
प्रह्वाजिह्वामदंहः प्रदहतु महिमोन्नाहभृन्नारसिंही ॥ ५२ ॥

निष्क्रान्तेवानयत्ताद्गलरववलतः साध्वसध्वस्तधैर्या-
त्प्रोन्मिलत्कम्पसम्पद्भयमयचरितोद्भावनप्रेक्षयेव ।
दंष्ट्राभिः स्फुष्टरोचिः पटलकरघटाघट्टनीभिः प्रदृष्टा
श्वासेव स्वान्तदेशे नरहरिरसनावासनाशासनो स्यात् ॥ ५३ ॥

दैतेयोद्दामधामद्रुमदहनघृताटोपकोपाग्निकीला
प्रह्लादोद्रक्तभक्तिच्छलनिलयचलच्छोणकोतुच्छविर्नः ।
स्याज्जिह्वा नारसिंहीविबुधपतिशुभादृष्टवासन्तवाता-
श्लिष्टश्रीवल्लिदृष्टप्रथमकिशलयश्रीरनिष्टप्रणष्ट्यै ॥ ५४ ॥

चञ्चत्पञ्चप्रकारे मुख इह भवितुं सांप्रतं पञ्चजिह्वा
व्यक्तैकाग्रेमहोग्रा पुनरपि भवितारश्चतस्रोऽधिपार्श्वम् ।
इत्यालोच्येत्र सीमाजिघटयिषुतयाकर्णजाहां जिहाने
स्मर्तव्ये सिंहमूर्तेर्भृशमपशरणैः सृक्कणीचक्रपाणेः ॥ ५५ ॥

प्रेङ्खन्निश्वासलेखं प्रकटकटकटस्फोटविस्पष्टदंष्ट्रं
श्मश्रुस्मेरत्वभीष्मं कुटिलिमविकटभ्रूकुटी भ्राजमानम् ।
क्रोधक्रूराक्षिचक्रं सरभसरसनाभोमतं श्रीमतङ्ग
द्वेष्टुर्द्राग्द्वेष्टुवक्त्रं मम विषमदशास्रष्टुरिष्टं गारिष्ठम् ॥ ५६ ॥

दंष्ट्रासंघट्टघोरज्वलदनलकणश्रेणिकीर्णप्रसूने
प्रोद्यन्निर्घोषवाद्ये प्रचलितबहलज्वालजिह्वामहोल्के ।
रौद्रश्रीलास्यरङ्गे प्रकटविकटरुट्सूत्रधारप्रचारे
सद्योविद्योतमानद्विपदलनतनोराननें नोरतिः स्यात् ॥ ५७ ॥

वह्निप्राचीरदीप्रप्रसृमरपरितः केसरे स्पष्टदंष्ट्रा
कुड्या संश्लिष्टयष्टिप्रचयपरिचिते भ्रूलतातोरणाढ्ये ।
जाग्रत्प्रग्रीवमित्रप्रतिभयनयने प्रह्वजित्वालतोद्य-
त्सोपानेगैन्द्रलक्ष्मीगृह इह नृहरेराननेमाननास्ताम् ॥ ५८ ॥

निस्त्रिंशभ्रंसनं द्राक्सृजतिकरतलाज्जिह्वयानारसिंहे-
दंष्ट्राभिः कुन्तशस्त्रीपटलविघटने भ्रूलताविभ्रमेण ।
कोदण्डभ्रंशचण्डेशितविशिखहरेश्रीकटाक्षच्छटाभि-
र्दृष्टानां दृष्टिमात्रात्प्रतिकृतिनिरतं प्रीतिरास्तां मुखे नः ॥ ५९ ॥

उद्यज्जिह्वामहोल्के मुखरिमखरनिर्घोषनिर्घातघोरे
भ्रूवल्लीश्मश्रुलेखाविलसितविलसद्धूमकेतुप्रकाशे ।
सङ्क्षोभाक्षुद्रचक्षुस्त्रिकविकसन संदर्शितार्कत्रयीके
तस्यास्ये स्यान्नमस्याऽसुरकुलदलनादर्शिताजन्यसैन्ये ॥ ६० ॥

दंष्ट्राधाटीकठोरक्रकचपरिचयेनाप्यखण्डस्वरूपा
सङ्कोचं कण्ठघोषेण च न च दधती भीषणेनोल्वणेन ।
लोके जिह्वापुटेऽप्यस्खलितपदवती भारती यत्र वासं
सा संवत्तऽप्रमत्ते हृदि भवतु हरेर्द्रागुपास्यं तदास्यम् ॥ ६१ ॥

सप्तार्च्चिः खण्डषण्डस्तवकितकुहराचुल्लिकेवोल्लसन्ती
दीर्णादीर्घादरीवोद्धुरर्रुधिरसुहृद्धातुधाराधुरीणा ।
पातालद्वारिवोद्यत्फणिफणमणिरुक्कन्दकीवृन्दलीला
लीलाहर्यक्षमूर्त्तेः क्षपयतु विपुलाववक्त्रकुक्षिर्मदंहः ॥ ६२ ॥

गर्जश्रीनिर्जिताम्भोधरपटलहठाकृष्टविद्युत्कलाप
प्रायां प्राप्तां समुद्रादपिपरिभविनो वैद्रुमीं वल्लरीं वा ।
रौद्रश्रीवीरवर्यावरवरणविधादत्तबन्धूकमालां
बिभ्रद्दैत्यान्त्रमालामतिपरुषरुषः पातु देवस्य कण्ठः ॥ ६३ ॥

माधुर्योद्रेकधुर्यं निजसहजपरिष्कारवर्यं विसृज्य
क्रौर्यश्रीवायमाणावसरमपरसं दैत्यपालात्त्रिनालाम् ।
घोराकारां घृणायाः पदमपि दधती यायमाणां हठेन
ग्रीवा श्रीवारणारेः शरणमिहपरं पीवरी वामनीवः ॥ ६४ ॥

माया हर्यक्षमूर्त्तेः क्षयसमयपयोवाहसाहस्रगर्ज-
स्फुर्जन्निर्घोषसम्भावितविदलनदिक्सन्धि सन्धुक्षणाय ।
उन्मिलत्कान्तितत्तूत्कटकरजघटासूचिसाचिव्यभाजो
विश्वद्रीचोनुविश्वोपकृतिकृतिभृतोभावयेद्बाहुदण्डान् ॥ ६५ ॥

नम्रादैतेयसम्राट्प्रतिभयपृतनाघातगुर्वीं किलोर्वीं
दिव्यद्दर्वीकरोर्वीपतिफणपरिषत्खर्वतां पर्वतान्ताम् ।
उद्धर्त्तुं प्रोद्धुरानुप्रतिदिशवलिताः सर्वतोऽखर्वमूर्त्तेः
साहस्राबाहवस्ते मम हृदि महिमोन्नाहबाहः स्फुरन्तु ॥ ६६ ॥

दीप्रं यद्विप्रचित्तप्रभवमृगदृशां क्षिप्रमक्षिप्रमोदं
निप्रघ्नद्विप्रवर्यं प्रतिभयरयभृत्कैटभाटोपलोपम् ।
चक्रं हर्यक्षमूर्त्तेः शरणमहमहोरात्रमार्त्तोभृशार्त्ते
रेमिद्राक्कालनेमिक्षतजरसलसन्नेमिकस्माद्बिभेमि ॥ ६७ ॥

बह्निज्वालाभजिह्वावकलनविकलत्वान्नुनासन्नवक्त्रं
निर्घोषैः कण्ठकम्बोश्चकितमिव महामौनमुद्रां दधानम् ।
घोषाघ्राण प्रहीणं जलजमिवसितं पाणिभूषायमाणं
शत्रुभ्यस्त्राणहेतोः शरणय नृहरेरम्बुजाक्षस्य कम्बुम् ॥ ६८ ॥

रुक्चक्रेणेव चक्रं प्रघनमधिमधुग्रासिकोग्राकृतीति
क्रौर्येण क्रौञ्चभेदे पटुरितिविकटां श्रीमहासेनशक्तिम् ।
दम्भोलिं जम्भशत्रोरहिहननमहासाहसोस्त्वद्धसन्तो
दैत्योरस्त्रोटयन्तस्तृणमिव नृहरेः पाणिजाः प्रोणयन्तु ॥ ६९ ॥

दैत्येन्द्रध्यानसन्ध्याध्वनिमुकुलितदिक्पातमालासुखर्द्धि
स्वाध्यायारम्भपूर्वोदितसतनुदशोङ्कारिकाकारभाजः ।
नागानामिन्द्रियाणां दशमृणि सदृशाः प्राणिना प्रोतिभाजां
प्रायः पारीन्द्रमूर्त्तेर्मम दशनखरास्ते खराः स्युः सुखाय ॥ ७० ॥

साक्षादालक्ष्यमाणं युधि दशनदगदाघातशोयप्रथिमा
दिङ्नागानां विषाणोरुमुषलशकलैः पाण्डुनिभिग्नमग्नैः ।
दैतेयव्याघ्रवक्षः प्रबलमदगदं शीघ्रमुल्लापयन्तो
भूशल्योद्धारकल्या भवभयभिषजः पाणिजाः पान्तु युष्मान् ॥ ७१ ॥

उन्मीलत्कालखण्डोत्पलममलिनकङ्कालखण्डैः कुमुद्व-
त्तद्वद्व्यक्तवुल्का मुकुलितकमलं स्ताग सृक्वाभिपूर्णम् ।
हंसापत्यातिरिक्तं सुररिपुवरहृल्लक्ष्यहर्यक्षमूर्तेः
क्रौर्यक्रीड़ातड़ागं क्षणमधिविदधुस्ते नखाः स्युः सुखाय ॥ ७२ ॥

उद्रङ्गद्रक्तलेखारुणवसनलताकर्षमुच्चैस्त्रिलोकी
लक्ष्मीं दैत्येन्द्रवक्षः स्थलपृथुलशिलास्थेयसीमीर्ष्ययेव ।
आकर्षन्तो द्विरूढां विबुधपरिवृतेनैव वाढं विधातुं
निर्भीति प्रीणयन्तु छलहरिवपुषः प्राणिजाः प्राणिजातम् ॥ ७३ ॥

वक्षः सीमन्तयन्तीनभिदुरभिदुरोरश्छदच्छेददक्षा
यत्किंचिद्विघ्ननिघ्ना इव घनमघवद्वज्रघातोत्थशोथैः ।
स्थूलास्थिग्रन्थिकूटे निविड़कड़कड़ोड्डामराक्रोड़ितेन
क्रीड़न्तः शक्रशत्रोर्नरहरिवखरास्ते खराः स्युः सुखाय ॥ ७४ ॥

चापल्येनापतन्तीमिवशिरसिरसज्ञां प्रतप्तासिलेखा-
भीमामालोक्यसीमान्तरगतकमला कौस्तुभश्रीवभीत्या ।
तारादारांशुधाराप्रतिमघनतमोल्लासवल्लीमवल्ली
लीनश्रीवत्सलक्ष्मक्षपयतु दुरितं लक्षहर्यक्षवक्षः ॥ ७५ ॥

अव्यादाकाशकाशस्तवकपरिणतः कूर्मलोम्नां विवर्तो
दृष्टान्तः शाशशृङ्गस्य च हरिदुदयंच्चित्रलेखैकमित्रम् ।
मिथ्याद्वैरथ्वसज्जं द्विपदलनतनोर्देहपूर्वापरार्द्धं
स्थित्यर्थापत्तिसाध्यं भवभयविकटात्संकटान्मंक्षुमध्यम् ॥ ७६ ॥

दैत्येन्द्रो दीर्घनिद्रामधितशितशिखैतन्नखैः खण्डितोरः
कण्डूतियत्रहस्तस्खलदसिफलकः स्फारपादप्रसारः ।
चञ्चज्जानुप्रघानातनुरुहनिबहप्रच्छदाच्छादनाढ्या-
मच्छेतः स्थैर्यं पट्याक्रमतु कपटहर्यक्षवक्षोरुखट्वा ॥ ७७ ॥

न्यस्ते रोषेणसाचिप्रसृमरपरितोदीधितौ यत्र रक्ते
मध्ये नम्रत्वकम्रं कुवलयमभितः सङ्गतोत्तुङ्गताकम् ।
उत्तानस्वर्णदण्डायुतकनकशलाकालिलालित्यशालि
च्छभ्राभामापतापानपनुदतु हरेर्वासजङ्घप्रकाण्डः ॥ ७८ ॥

स्तम्भोद्भूतस्य भूमेरुपरि लिपदसृक्चालनं स्यन्दमाना
घोऽनूनारुखलक्ष्म्यादितिसुतपृतनापादघातार्तिभाजः ।
भाले श्रीखण्डपुण्ड्रं लिखदिवनखरज्योत्स्नयावत्सलत्वा-
त्प्रह्लादस्यप्रणामप्रवणितशिरसः पातु पादद्वयी नः ॥ ७९ ॥

रुन्धन्तीबारिबन्धूनधिरुधिरधुनीबन्धुबन्धूकमूर्त्ते-
राकृष्याशानुविश्वाः स्वयमपि युगपद्योजयन्ती पभान्ती ।
द्वैतं द्यावापृथिव्योर्दवयितुमुदयन्मांसलानी चवोचि-
र्विश्वद्रीचीमरीचीततिररुणसमीचीनरोचिर्विचिन्त्या ॥ ८० ॥

आस्थानद्वारितिष्ठन्नसुरवरहृदोदारणायैकनिष्ठः
क्रोधः श्रीपृष्ठनिष्ठप्रततफणवृहद्दीर्घपृष्ठस्थविष्ठः ।
प्रह्लादाप्तप्रतिष्ठः प्रवलदनुजनुः सैन्यविन्यस्तनिष्ठः
पायाद्देवोव शिष्ठप्रभवभवनुतोदेवगोष्ठीगरिष्ठः ॥ ८१ ॥

दन्तेभ्यः पाणिजेभ्यस्तुहिनगुभगिनी सोमलेखासुहृद्भ्यो
नो विभ्यत्यब्धि शब्दश्रवणपरवशाघोरगम्भीरघोषात् ।
और्वज्वालालतायाः कणकुसुमहृदप्युग्रजिह्वालताया
यस्याङ्के निर्विशङ्कं जयति जलधिजासैषदेवोऽवताद्वः ॥ ८२ ॥

एषब्रह्माण्डभाण्डामितविततवपुः सज्जलस्वान्तदेशे
स्व च्छन्दामन्दलीलोविषयसमुदयाकुञ्चितत्वाञ्चितेऽपि ।
काष्ठाकैवल्यलक्ष्म्या जगति कतिपयैः कल्पितः कार्यदृष्ट्या
देवश्रीमान्नृसिंहोऽवतु परममहामप्यणोर प्यणीयान् ॥ ८३ ॥

उच्चैर्घुष्टप्रहृष्टत्रिदशगणघनश्लाघनाघूर्णनोद्य-
न्मूर्द्धाधोध्वस्तपुष्पस्तवकविकसितैस्तारका चक्रवाकैः ।
दुष्टोरः पाटदृष्टिस्फुटविकटसटाकम्पसम्पत्तिचक्र
च्छिन्नै राच्छादिताङ्गश्छलनृहरितनुर्यच्छताद्वाञ्छितं नः ॥ ८४ ॥

आभातीतेन्दुधामासदरिदरकरः सर्वदानव्यमाभृ-
त्कायोदारः सदारोचितदशनखरः कोपितत्वाधिकारी ।
आभातीतेन्दुधामासदरिदरकरः सर्वदानव्यमाभृ-
त्कायोदारः सदारोचितदशनखरः कोपितत्वाधिकारी ॥ ८५ ॥

तिष्ठन्नम्भोजपृष्ठे जलनिधिजनुषोरोजुषाराजमानो
विद्युज्ज्वालाकलापोज्ज्वलविपुलसटाकीर्णविस्तीर्ण वक्त्रः ।
जान्वोर्विन्यस्तहस्तः कटितटविवलद्योगपट्टस्फुटश्री-
भाजोः शङ्खारिधारी जयति नरवपुश्चित्रपारीन्द्रवक्त्रः ॥ ८६ ॥

पातूरः पीठपट्टाश्रितजलधिजनिर्योगपट्टाभिरामो
दैत्योरः पाटकट्टारकखरनवरोभ्राजदट्टाट्टघोषः ।
संसारक्लेशहट्टापहरणमहिमा यो हृदट्टाधिवासी,
भक्तानां देवभट्टारककलितनुतिः पीतपट्टांशुकः सः ॥ ८७ ॥

सत्रासत्राणकर्त्रीरिपुसुतविपदः साधुनानाधुनाना
मारामाराजिवक्षानखविदलितदुष्टासुराभासुराभा ।
सामासामादिगीतानिजपदकमलालम्बतारावतारा,
भीमा भीमार्थदक्षातनुरवतु सुधाभानुमालानुमाला ॥ ८८ ॥

प्राप्तामुद्राविलेशेन परममहता येन यः सत्तरण्या-
कारां पृथ्वीं दधानो वरभुजगवरत्रासरक्षां विभाति ।
शार्ङ्गश्रीशोभमानां स्वतनुमवतु नः शङ्खालूच्चैर्महिम्ना
पारावारप्रभावः स नृहरिरपरायस्यमैनोहमूर्त्तिः ॥ ८९ ॥

ज्यायस्य भासमाना भवति न तनुरुट्शालिनी याऽरिराजि
श्यामाक्षीरोदनीरोच्छवसनकुशलिनीयकृद्वृत्तपान्ता ।
हन्यान्मूर्त्तिर्हरेः स्यादुरितमतिवलाकाच्छपीनाममावा-
तिक्रान्तादीर्घपृष्ठं परमपि दधती मां दरश्रोनिधानम् ॥ ९० ॥

देहो यस्याम्बुवाहोपलसितरुचि भूयः सरस्वत्युपास्यः
पाता लक्ष्माखरांशुप्रतिमनखगणो यो हिरण्याक्षजेता ।
योऽनन्तोल्लासकान्तो विलसतिबहुलोमावली यस्य धाम्नि
श्रेयो दद्यात्स देवो निजजनमहसे लब्धभूदारभावः ॥ ९१ ॥

उद्यत्प्रह्लाद संपन्नखरकररुचिः सर्वदा राजदन्त
श्रीधारीयोऽरिद्वारास्तझरविवरणोघोऽनुरज्वद्रसज्ञः ।
विल्लोलास्याधिकारो विकसिततनुरुट्केसरीकोऽपि लोके
कल्याणं स स्वतुल्यः प्रणयतु परितोऽलंक्रियाभासमाना ॥ ९२ ॥

लोकप्रह्लादसद्भूद्रपदजनमतीप्रोल्लसद्येवकार्या
यासारम्भो दधानध्वनि विभववतो चुम्बिमर्कक्षिमाला ।
कौपीनप्रीतिधात्रीवलिनियमनयालोकहर्षप्रकाशा
शुक्लाक्षिस्फोटभीमाहरितनुरवताद्वामनी चाधिकासा ॥ ९३ ॥

प्रस्यापद्वर्द्धनीयाशशिदरपरशुभ्राजितादानवार्या
मारीचायादितक्ष्मापकृतिगुरुमहादेवशास्त्राधिकारा ।
भार्गव्या भासमाना हृदि मम बहुशोकार्त्तवीर्याविरास्तां
मूर्त्तिर्देवस्य कापि प्रतिदिनमविताम्नाय शैलोमुखश्रीः ॥ ९४ ॥

यो गाधेयाग्निनेत्रीगतदुरितशतानन्दसूर्या च तारा
भर्त्तुर्लक्ष्मीं दधाराह्रियत किल ययाप्युच्चकैरावणश्रीः ।
या वैदेहाप्तभीतिक्षयकरमहिमा साधुसाराघवीति
ख्याता मूर्त्ति हरेर्नो वसतु हृदि पराभूतमायाकुरङ्गा ॥ ९५ ॥

योऽभूत्सन्तापसन्तालवनखरघटाहारिहस्तो यदीया
सच्चक्रे सूतमृत्युं करणकुशलता सूर्यजाकर्षशील:
यश्चेतोहारि हालाहलभृति बहलप्रीतिरुत्तालकेतु:
प्रेयो वृन्दावन: कौरवगुरुरभित: श्रीहरीरक्षतान्न: ।। ९६ ।।

प्रत्यक्षाधिप्रमाणोऽनभिमतपरलोकप्रहर्षोनयेके
प्रह्लादे चान्तर्निष्ठे घृणयति घृणिमालृच्छविद्योतितोय: ।
सर्वेषां मूलहेतु: किल यदभिमतो भाव एव प्रसिद्ध:
संसारादुद्धरेन्मांकपटहरितनु: शुद्धबद्धस्वरूप: ।। ९७ ।।

सार्द्धं दुष्टै: प्रवृद्धै: कलियुगमलहृत्सिन्धुजारोहशाली
यो भूदेवाधिराजप्रणयवशभयालब्धजन्मानुकार: ।
संसारे सत्यधर्माचरणपरवशो य: कृपाणां समुद्रो
देवोहृद्रोगहन्ता भवतु नरहरिर्भास्वदन्तप्रकाश: ।। ९८ ।।

दैत्यानां कालदण्ड: स्फुरतु हृदि हरेश्चण्डलाङ्गूलदण्ड:
शक्रश्रीलास्यदण्ड: स्वजनघनकृपाकेतनोल्लासदण्ड: ।
आपद्दोषण्डदण्ड: सुरपुरतरुणीत्रासभाण्डोघदण्ड:
स्वर्लोकच्छत्रदण्डस्त्रिपुरनिजजनुर्घोषणातोद्यदण्ड: ।। ९९ ।।

स्वर्गे संसर्गवत्यादिति तनुजभुजा वीर्यलक्ष्मीयुवत्या:
प्रोदस्तं किं नु दस्ताकलितकचकुलं क्ष्मातले पातनाय ।
क्रोधश्रीबाहुदण्डं वलयितसितरुङ् मण्डलं तत्प्रचण्डं
चेतो ब्रह्माण्डकेतो स्मर हरिवपुषो वालहस्तप्रकाण्डम् ।। १०० ।।

उष्माकुष्माण्डषण्डोदयतु हृदि नते जानुनोर्यातुनोभी:
प्रेता: केतावदष्टौ त्यजत मयि महाभैरवा वैरवार्त्ताम् ।
रुष्टत्वे तेन दुष्टग्रहगणगणनाकालकङ्कालसम्प-
त्संपन्नाते मदास्यं मदयितु मुदभून्नाम यन्नारसिंहम् ।। १०१ ।।

क्षिप्रं सर्पापसर्पं व्रजवनगजते विद्रवं छिद्रदेशा
दद्रे निर्गच्छतुच्छद्रविणनहिमदादच्छभल्लप्रपञ्च ।
मा सिंहत्रासरंहः शरभ सरभयं याहि शार्दूलदूरा
दाह्वाजिह्वाञ्चलं नश्चपलयति यतश्चित्रपञ्चास्यमूर्त्तेः ॥ १०२ ॥

कश्चित्कौत्स सवंशकैरववनीप्राकाश्य राकापतिः
कृत्वा मर्त्यंहरेरमर्त्यकलितां श्लोकैः शतैर्मौक्तिकैः ।
मालां दूषणदूरणाय गुणवद्विज्ञानसाणार्चितां
सत्कण्ठार्पणतो जगाम परमानन्दं स गङ्गाधरः ॥ १०३ ॥

॥ श्रीनृसिंहस्य शतकाख्यं खण्डकाव्यं सम्पूर्णम् ।

गुणिडचाशतकम्

गुण्डिचाशतकम्

विलोचनकदम्बकं[1] यदुपलभ्य लुभ्यत्किमा-
लिलेह नहि किं पपौ नहि ममज्ज किम्वा नहि ।
परं तु किमिवाभवन्नवतमाललक्ष्मीतिर-
ष्क्रिया निगमसाम्प्रदायिकमुपास्महे तन्महः ॥ १ ॥

अबालकजवाधरः सलिलबाहवाधिद्युति-
र्नवाब्जवनवादिदृक्[2] बृहदवार्य्यं बाहुद्वयः ।
सवाङ्मनसवाह्यदृक् प्रमदवारवारांनिधि-
र्भवाल्लवणवारिधेः सविध[3]वासवानुद्धरेत् ॥ २ ॥

यदीयसुषमावलोकनमुदः शरत्कौमुदी-
कदम्बपरिशीलनप्रमदघाटिका चेटिका ।
तदम्बुज[4]कदम्बडम्बरविडम्बि किंचिच्छर-
त्सरोज दुरहंकृतेरनवकाशवेत्तं भजे ॥ ३ ॥

सिताभ्रचयपङ्किलाविधुशिलाम्बुवापी विधु-
प्रभाम यासरोजिनी यदि सृजेत्प्रसूनं नवम् ।
तदीयमुपमा यदीयनयनस्य निःस्यन्दिनो-
ममन्दमुदमम्बुधेस्तटकुटीचरं तत्क्रियात् ॥ ४ ॥

---

१ । कदम्वनं
२ । दृग्
३ । सलिल
४ । तदम्वुद

कुतूहलमयी हरिन्महमयं नभो मेदिनी
प्रमोदलहरीमयी जयति यत्र तत्र क्वचित् ।
मतिः परमरक्त यद्वदनबिम्बसंचुम्बिनी
तदस्तु वटभूरुहस्तटचरिष्णु धामश्रियै ॥ ५ ॥

किमङ्कुततेः किमुल्लसनसम्पदः किमहो-
त्सवस्य कुतुकस्य किं किमु तपत्रयी विस्मृतेः ।
बभूव हृदयं यदाननविहारि जाने न[1] त-
त्पुनातु लवणाम्बुधेः सविध चुम्बि किंचिन्महः ॥ ६ ॥

अधीनमिति यत्कृपाविमुखमित्यशेषोपमा
ससंग्रहमितिद्युतिप्रणयपूर्णमित्युत्सवः ।
अजस्रमनुशीलयत्यधिकलुब्धमित्यक्षि त-
द्वटावनिरुहस्तटीघटित धामधामाश्रये ॥ ७ ॥

यदीय रजसां गणः कवलितोडुवासाङ्गणः
पतत्यमिततारकप्रियकरच्छटाकारकः ।
सुधां किरति यत्कलाकरगुलालराशि[2]र्दृशो-
स्तमम्बुदकुटीचरं[3] कमपि कान्तिसारं भजे ॥ ८ ॥

सुधांशुमयपांशुमांसलमृजं सुधारा सुधा-
निधौ[4] तमतिनिर्मलं प्रबलकौमुदीप्रोञ्छितम् ।
परस्परविघर्षणैर्विहित शामित[5] स्रोतसं
भुवि क्व च न पुञ्जितं[6] मधुरिमाणमन्तर्भजे ॥ ९ ॥

१। वाने न
२। कर पुलाल राशि
३। स्तदम्बुधितटीचरं
४। विधौ
५। शामंण
६। चुम्बितं

प्रतिक्षणरतिक्षणप्रदमुरारिपादद्वयो-
बिहारसुखसञ्चितद्राढमनोलशैलद्रवे ।
आपावृतवलत्रपा[1] भरजयाय मादृङ्मनो
द्रवं विरचयन्मुदं मधुरिमास कोऽपि क्रियात् ।। १० ।।

वदान्ययशसो जगद्विजयगर्वगम्भीरिमा
तुलाकणकलङ्कितानवसरः क्षमासम्पदः ।
महोर्मिभरिताद्भुतस्तवकिता कृपाचातुरी
तुरीयपुरुषार्थदं जयति मर्म्मशर्म श्रियाम् ।। ११ ।।

दृशोरमृतवापिका मधुरिमैकधाराधरे
घनप्रमदकन्दलो वपुषि पीनबाहुद्वये ।
भवामयपयोनिधेस्तरणसेतुरव्याहतं
पदं[2] मनसि काचलाचरतु[3] सा चितश्चातुरी ।। १२ ।।

परेतपतिविक्रमाह्वयनिदाघचण्डातप-
व्यथादलन[4]केलिकौतुककदम्बवानम्बुदः ।
क्रियाज्जलधिकूल भूम्युदित[5]भाग्यलक्ष्मीवधू-
प्रसाधनविधौ हरिन्मणिजदर्पणस्तर्पणम् ।। १३ ।।

सखे किमुपलभ्य कां ननु दशां भजे वेद्मि नो
परस्परमिति ब्रुवद्वचनसत्यतासिद्धये ।
निमज्ज्य सुखनीरधौ नहि बहिर्ययौ दृङ्मनो-
द्वयं यदवलोकने तदवलोकवाञ्छासु नः ।। १४ ।।

१। अपाकृतवलस्तुपा
२। गदं
३। काचनाचरतु
४। व्यथाकवल
५। भुमुदित

दुरुद्धरमहाधमाधिपतिमादृशोद्धारणा-
तिभारगिरिविघ्नवन्मधुरिमाब्धिवीचिप्लवः ।
जगन्नयनभाग्यवैभवमहोषधीनाथव[१]-
द्दयाद्रवमहोदयः[२] स्फुरतु कोऽपि मन्मानसे ॥ १५ ॥

महोत्सवकरम्बितामितरगन्धशून्यां पर-
प्रमोदमयसृष्टिमुल्लमितलोभकोषं दृशोः ।
अकण्टकविलुण्ठनापथ[३]मनश्वरश्रेयसां
मुहुर्मुहुरहं महो घनमहोज्ज्वलं कामये ॥ १६ ॥

कलङ्ककपटस्फुटा[४]दररदच्छटा पङ्किलं
यदाननसुधाम्भसः कलुषहृत्पटोमण्डलम् ।
धिनोतिवसुधां सुधामयमयूखमालीमुहु-
र्मम प्रमददोहनः स भवताज्जगन्मोहनः ॥ १७ ॥

यदाननसुधाकरद्युतिसुधाधिपानेच्छयो-
र्मुहुर्विवृत सर्वता मुखमतित्वरं धावतोः ।
अनाविलमणिमयाभरणमन्तरायद्विषाऽ[५]-
भवन्नयनयोर्ममाभयनयोदयं[६] स क्रियात् ॥ १८ ॥

मदंहसि मदं हसत्यलमनूननानैनसां[७]
प्रचण्डिमपिचण्डिले मर्षति हिण्डमाने[८] मुहुः ।
चलत्पतितपावनाधिपपताकिता[९] स्तम्भभृ-
त्प्रसारित भुजद्वयः स मयि निर्दयः किं भवेत् ॥ १९ ॥

१। वाधव
२। महोदयः
३। अकण्टनविलुण्टनापण
४। स्फुटो
५। त्विषा
६। भिनयनोदयं
७। नानैकसां
८। दीप्तमाने
९। व्रत य तार्किका

सपत्नविरहो महोल्लसितमाधुरीसम्पदां
सहासननवोत्सवो निखिलमोहलक्ष्मीतते: ।
परप्रमदकन्दलीवलदमन्दलीलाभरः
स रक्षतु पुर:सर: सरसिजस्रजश्चक्षुषा ॥ २० ॥

पराजितवराकरक्तकन[1]वोष्ठलेखाकर:
श्रिया विमलनाकरक्षणशिलाविलासाकरः ।
मुखेन हरिणा करम्बितसुधांशुनिन्दाकर:[2]
स मेऽस्त्वघनिराकर: खलु गृहीतपद्माकर: ॥ २१ ॥

कृपालुकुलमौलिना सपदि येन सम्पत्तथाऽ-
वनीयकमनीयतापदतनूरुचिन्तापदम् ।
ध्रुवस्य च यतस्तमाश्रयमनस्तमालच्छटा-
वनीयकमनीयतापदतनूरुचि तापदम् ॥ २२ ॥

क्षितिक्षितिधरेन्द्रहे शरणशून्यताशालिनां
गणे सुरतरुपमोचित महेऽभवं ध्यायताम् ।
श्रियं च सुहृदे ददद्वितरसन्मतिं भूपजा-
ङ्गणे सुरतरुपमोचितमहेभ वन्ध्यायताम् ॥ २३ ॥

जबाधरदरस्मितं मुखरुचा सुचान्द्रप्रभा-
करं विततमालसारसदृगन्तरङ्गाहृताम् ।
दिशं विरचयन्महो विपुलबाहुपुष्पावली
करम्बित तमालसारसदृगन्तरं गाहताम् ॥ २४ ॥

अरे हृदय ! य: सुधारसनिधानवेणुध्वनि
वनेजनयनाशयाऽतनुतराधिकारङ्गदम् ।
तमोक्षणनटं सकृत्तटवतीघतोरस्थली-
वने जनय नाशयाऽतनुतराधिकारं गदम्[3] ॥ २५ ॥

---

१ । वराकर: कनक २ । निद्याकर: ३ । राधिकाराङ्गदं

प्रपन्नपरिपालने पतितपावने पाटवो
पवित्रपदपङ्करुट्पतनपूतपाषाणकः ।
पयःसु परिपन्थिपीडितपदस्य पाता प्रभुः
प्रियं प्रतनपूरुषः परमपुण्यदः पूरयेत् ।। २६ ।।

महेन्द्रमणिमञ्जुतां मलिनयन्महोमण्डलै-
र्मनोहरमहामहामधुरमर्मणा मदनः[1] ।
महीध्रमयमन्दिरे मनुजमत्तताम ञ्जरो[2]
मधुमंथनकृन्मघोर्मसृणयेन्मदीयां मतिम् ।। २७ ।।

उदञ्चितसमुच्चकोरकरुचिप्रसूनस्मितं
स्फुरत्त[3]रलतातिखेलदलकान्तभालस्य भृत् ।
स्वरूपमिह तेन कः प्रकटवासवेलावने
जजल्प कुशलान्यनल्पय मुकुन्दकल्पद्रुमः ।। २८ ।।

सुधारसमयोदयं मुहुरुदञ्चयन्यः स्वरु-
पलक्षणरुचिच्छटापटिमपूरिताशातटः ।
ज्ञानाञ्जन[4]रुचि दधाति बहुधा नवं राश्रितो
महोभिरनिशं दिशेत्कुशलमम्बुजाक्षोऽम्बुदः ।। २९ ।।

अरं कुधरधामवन्न रजनीमहोल्लासभृ-
त्कलापचयपूर्णविग्रहमहः श्रिया भास्वरम् ।
न कैरवगतां मुदं दिशति यन्न दीनोदये
पराङ्मुखमहं भजेऽद्भुतसुधानिधि धामतत् ।। ३० ।।

अनुक्षणरसार्द्रतां[5] सृजति यो यदीयं वल-
द्विनोदकमलं वपुः कलयतेऽपि यस्योदयः ।
न चन्द्रकिरणो[6]च्चतामपि च ताड़िता लोक स-
न्तति यमनुमोदिता स्मर तमद्भुताम्भोधरम्[7] ।। ३१ ।।

---

१ । मर्दनः
२ । मत्ततान्मञ्जरी
३ । स्फुरन्त
४ । घनाञ्जन
५ । रश्मद्रितां
६ । करिणो
७ । स्मरतिमारुताम्भोधरम्

तुलानवसरो जवानवसरोजवासोष्ठहक्[1]
घनाञ्जनकलापगञ्जनकलापगर्हच्छविः ।
भुजायुगमहोरुचा युगमहोरुचातुर्यभाक्
भजन्मदवलम्बतां मदवलं वतात्तेंहरेत् ॥ ३२ ॥

भविष्यदरुणानुजध्वजवियोगचिन्ताशुचो
विदीर्ण[2]शितिशैलहृज्जनित[3]रक्तधारोपमम् ।
शिवं दिशतु नीलभूधरविलग्नसोपानभू[4]-
पतद्बहल तूलतुन्दिलविशालशोणांशुकम् ॥ ३३ ॥

हृदामितरवृत्तिभिः सह विधूतमूर्तिक्षणं
समं कमलकोरकाकृतिकरैरुहस्तं ततः ।
स्खलत्तदनुपीठतः सह सहस्रनेत्रोदकैः
क्रियात्किमपि मन्महश्रियमनारतं तन्महः ॥ ३४ ॥

नदाधिपनदाधिपल्लवितलोककोलाहला
स्फुटार्त्तिविनिवेदनाश्रवणसावधानः किमु ।
सलोलसवनस्थली गमनकौतुकोपक्रमे
तिरोवलितकन्धरो धरधुरन्धरोऽस्तु श्रियै ॥ ३५ ॥

जगद्विहरणोचितस्वतनुसग्रहासङ्गतो-
त्तरङ्गरुचिराङ्गसंग्रहविधित्सया किं धुतः ।
गमोत्सवसमुत्सुको द्यतु मदंहसां रंहसा
वलान्य धवलावनीधरवनोवसन्तो विभुः ॥ ३६ ॥

प्रमोदजलधौ निमज्जति मनो जलार्द्रादृशः
कदम्बकुसुमश्रियं हरति वर्ष्मबद्धोऽञ्जलिः ।
प्रधावति जयध्वनिर्निपतितं शिरो भूतले
स कोऽपि समयः क्रियाद्रति चरित्रचित्रश्रियम् ॥ ३७ ॥

---

१ । वाम्बोष्ठहग्
२ । विभिन्न
३ । हृद्गलित
४ । सोपानि का

पुरापरिचितेतरप्रणय चातुरीं कस्यचि-
न्मतिं नवकुमुद्वती[1]मभिलसन्तमालिङ्गितुम् ।
बहन्तमवरोहणं किमु कलाकरं तं भजे
शितिक्षितिधरस्खलद्विपुलगण्डशैलोपमम् ॥ ३८ ॥

शनैरनुसरत्तरप्रमदवारिपूरेक्षण-
प्रमुक्तजनतेक्षणप्रकरसावधानः[2] किमु ।
स्वकीय चरणद्वयी विरहमाण[3]भक्तावली
मनोव्यथनशङ्कितः किमु मृदुव्रजन् पातु नः[4] ॥ ३९ ॥

अनाथजनतार्पितं भरणभारमाविर्भव-
त्कृपादरमुपाददे किमु विलासयात्रालसम् ।
दरोदितशिरोन्नति क्वचन चारुगारुत्मत
प्रभालघिमकारु तद्भवतु दारुकारुण्यभाक् ॥ ४० ॥

विपन्नजनतावनप्रचुरधावनत्रासतः
सदारतिकरक्षणव्यतिकरस्पृहोल्लासतः ।
विलम्बमवलम्ब्य चुम्बति नितान्त[5]घोरा गति-
र्यदीय[6]पदसारसं समदसारसङ्गं हरेत् ॥ ४१ ॥

विधूतिमभितोदघद्बहुविधां मुहुर्मादृशा-
मनुद्धरणदुर्दमाद्वहलदुर्यशः कर्दमात् ।
समुद्धृतिविधानकृन्मुरहरस्य लोकोत्तरो
जयत्यतितरां हरेरपि हरेः प्रयाणोत्सवः ॥ ४२ ॥

मुहुः परिजनोत्करैद्धूतगुणैः कृताकर्षणो
नरप्रकरवीक्षितः सकरतालकोलाहलम् ।
गृहीततनुरुद्धटैरलसयानशीलोऽवतु
व्रजेश[7]पुरनागरीवसनतस्करो दुष्कृतात् ॥ ४३ ॥

---

१ । कुमुद्वती
२ । सानुरोधः
३ । विहरमाण
४ । पातुसः
५ । निअन्त
६ । यंदाय
७ । दव्रजेश

सुखाम्बुधिगभीरतावकलनादिवोद्धवं स्फुर-
द्भुजाघविनिवेदनाप्रवणलोकसन्तानकम् ।
मृदङ्गरवरङ्गतुङ्गिमतरङ्गिघण्टारवं
भजे पशुपदारदृक्पतनपात्रयात्रोत्सवम् ॥ ४४ ॥

महीतलमहो जगद्विजयवादि निःशाणज-
प्रणादभरनिर्भर भ्रमधुरीणसंनाहिनम् ।
भजेऽचलपरेतराट् पतितराज्यधैर्याचल-
स्खलत्पृथुशिलारवप्रतिममंघ्रिघोषं हरेः ॥ ४५ ॥

स्वतः प्रसरणोत्सुकामरुणचेलभामेलना-
दशृङ्खलितखेलितां नवसुधांशुधारोन्मदाम् ।
विघूननपरम्परोदयविघूतसाम्यासु मां[1]
भजामि वदनद्युतिं मदनमोहनस्य प्रभोः ॥ ४६ ॥

करोद्धरणवाञ्छया करिवरस्य गाढत्वरा-
वगाढसरसो मिलन्मलिनकण्टकैः पीडनम् ।
नतोन्नतनिजाङ्गजङ्गमतयैव संसूचय-
न्नुपाधिविगलत्कृपानदनूपाल[2]पादोऽवतात् ॥ ४७ ॥

कनत्किशलयावली सुललितप्रभारामव-
न्नवारुणरुचारुणं क्षणविपत्त्रियामान्तवत् ।
महेन्द्रमणिमानसपदणिमानमानर्त्त यत्
जयत्यतिलस[3]ज्जवा विजयसज्जवासो महः ॥ ४८ ॥

वपुर्लवणिमोर्मिषु प्रतिफलन्निजास्य प्रभा-
वलोकनवलोत्थिता मम विमोहिता नो हिता ।
भवेदिह महाघमोद्धरणपात्रयात्रोदये
मुरारिरिति चिन्तयन् किमु समावृताङ्गोऽवतात्[4] ॥ ४९ ॥

---

१ । साम्यासनां
२ । कृपाल
३ । तीवविलाष
४ । वतात्

अये हरिपदद्वये हृदयखेलवेलातिगं
तदीययुगपद्गतौ बत कुतो विमर्षस्तव ।
यतस्तदपदोषमानसपदं च हन्ति[१] त्वया
विमृष्यमिदमेव यद्भवति विभ्रमश्रीर्गतिः ॥ ५० ॥

मुकुन्दमुखवापिकाजगदपूर्वलक्ष्मी समु-
द्गमाग्रसरबुद्बुदप्रतिममिन्दु बिन्दुव्रजम् ।
प्रफुल्लतरमुल्लसद्भुवनमोहवल्लीनव-
प्रसूनवलयभ्रमं प्रवलयन्तमन्तर्भजे ॥ ५१ ॥

दुरापरमणीयमारमणवक्त्रकान्तिछटा-
वलोभतः[२] किमु शिरस्तटोद्ध्वं गता ।
मदीयनयनायनी भवतु कापि यात्रोत्सवो-
त्सुकस्य परमेशितुश्चरमचुम्बिनी पट्टिका ॥ ५२ ॥

जनार्दनदृशोर्भृशोल्लसितपुण्डरीकोत्करा-
धिराज्यगरिमोपरिस्फुरितचामरोड्डामराम् ।
भजे फणिफटाछटानटललाटसीम्नि भ्रुवा-
समां विलसितामनाविलसिता[३] भ्ररेखाद्वयी ॥ ५३ ॥

हरेर्गमननिःस्वनैः शमनयातनानिःसर-
न्मुरारिपुरसंमुखप्रबलपापिनां[४] विघ्नदौ ।
विघातविनिवारणं[५] निगदितुं किमु द्वाःस्थितौ
विहायसि विहारिदृक् क्वचन चक्रभृत्पातु नः ॥ ५४ ॥

नृलोकविषदोल्लसत्सुकृतजालबद्धं बहि-
र्गतं श्रुतिगिरोऽम्बुधेः[६] किमपि रत्नमभ्रप्रभम् ।
महीपटतटस्थली ललितलोचनालंक्रिया
प्रियाणि चपलं क्रियाद्वसनदामबद्धो हरिः ॥ ५५ ॥

---

१ ।	वहन्ति	३ ।	मयनृविलसिताद	५ ।	दारण
२ ।	वलोकलवलोभन्तं	४ ।	पापिना	६ ।	शिशोऽम्बुधे

ललाटतट भ्रूनटत्पटुकुरुण्टकस्रक्चल-
स्रवोनशतपविकास्तवकमिन्दुविन्दुत्विषा ।
तरङ्गनिकरं गतावधिमर्धिश्रयद्विस्मृति
प्रयातु वदनं न कम्पदवदन[1]शोभाम्वुधेः ॥ ५६ ॥

गमक्रमकुतूहली क्वच दधद्भ्रमोविभ्रमी-
समुद्घटितभङ्गिमन्दिरकपाटवत्पाटवम् ।
गुणालयमृणालिनी कुसुमकान्तिकीर्त्तिश्रिया-
मनध्ययनलोचनः कलुषमोचनं नः क्रियात् ॥ ५७ ॥

नखद्युतिविलासवैभवलवार्थिकोटिक्षपा-
करप्रकरमाधुरोपदनिपातदैन्यग्रहात् ।
ध्रुवं स्रदिमशालिसुन्दरगतिर्गति[2]मादृशां
दृशा विषदपुष्करद्युतितिरष्क्रियायुष्करः[3] ॥ ५८ ॥

अगाधनिज[4]माधुरीधृतनिमज्जनायाः श्रुते-
र्विकर्षणवशादिवोत्तर[5]लमौलिभिर्मानवैः ।
गृहीतमरिजंत्रयात्रिकमिवाखिलाशाचरं[6]
भजे मुरजयि क्षणे मुरजघण्टिकानिस्वनम् ॥ ५९ ॥

निमेषकणिकाविपद्युवतिदर्शनं दुष्क्रिया
द्विषन्विविधविभ्रमो नृप चमूजुगुप्सास्पदम् ।
यदन्यदखिलं तदप्यपथमेव यस्मिन्दृशो-
र्मुकुन्दवदनस्पृशोः ससमयोऽस्तु नः श्रेयसे ॥ ६० ॥

विलोकितमितस्ततो विरचयन्नि वान्वेषय-
न्निनाकलितमादृशः किमु नताननो लज्जया ।
मदीय पतितावली नृपतिता सहस्रासहः
सहस्रदलहा[7]सहर्षदविलोचनः सम्भवेत् ॥ ६१ ॥

१। कम्पदन
२। पति
३। यस्करः
४। अगाधजन
५। विवोत्तर
६। यात्रकखिलामिवाशाचरं
७। दलदा

मुहुर्मथितलोचनोच्चयविषादचक्रं चल-
त्तमालतरुमस्तकोत्थितशिताब्जमत्यद्भुतम् ।
चलद्दलितकज्जवलद्युतिमुरारिमौलौ मिल-
त्त्विषा धवलदीधितेः[1] प्रबलमातपत्रं भजे ॥ ६२ ॥

चलन्नुहरिभूतवैभववनीसमुद्भूदव-
म्महाद्भुतमहामहीरुहबृहत्पलाशोपमम् ।
स्मरामि वियदुन्मुखं किमपि मण्डलाकारभृ-
त्पटेन घटनाद्घना[2]घनघटानिभेनोद्भटम् ॥ ६३ ॥

परेतपृतनापतिः पतितमण्डले चण्डता-
मखण्डबहुदण्डदां प्रकटयन्यदाकर्णनम् ।
गतेषु पतितेषु पूत्तनजनत्रतासम्भ्रमं[3]
त्रपाबहलमाबहत्स हृदि गाहतां काहलः । ६४ ॥

घनांशुमघनाशनाकृतिघनाघनाडम्बरं
विलोक्य विहितप्रडोनगतयोऽगतीनां गतेः ।
दृगम्बुजविहारलोभत इवापतन्तः सित[4]-
च्छदाश्चलदुपर्यधो जयति चामराणां कुलम् ॥ ६५ ॥

प्रहारसकलीभवन्नमुचिवैरिकैरोटभू-
त्रुटन्मणिगणस्फुटोल्वणक्षणत्क्रियामांसलः ।
पलायनपरायणव्यसनवारहाहारवा-
नवाप्य कलितोन्नतिर्जयति कोऽपि[5] वेत्रध्वनिः ॥ ६६ ॥

जगत्त्रितयभान[6]कृद्यदुकुलप्रदीपप्रभा-
प्रभा[7]सनसमुद्भवस्मयरयादिवोद्ग्रीवताम् ।
गतैः किल शिखाशतै[8]र्घनतमास्तमाघस्मरा
स्मरामि धरणीपतेः सरणिदीपिका दीपिकाः ॥ ६७ ॥

---

१ । मिलद्दिषा धवलदीधितेः
२ । घटनाद्घटा
३ । त्रतासंभ्रम
४ । स्थित
५ । चोत्र
६ । त्रितयडीन
७ । प्रभा
८ । शिशतैं

शरद्विमलकौमुदीमयमहोमहाह्लाद[1]भू-
धरोपरिपरिस्फुटाऽमृतझरीव लीलावहा ।
सुधाधरणीरोहणत्रिजगतोमनोमोहनो-
त्तमाङ्गतलनिर्गलत्सलिलनिर्झरी पातु नः ।। ६८ ।।

रसास्थितिवशात्कृपाकृपानिधिकटाक्षास्पदं
ततो विधिवलाद्वलावरजमौलिसीमां गतः ।
अनाप्तजलजाक्षवीक्षणलवस्तदाकांक्षया
विनम्रवदनो घटस्तृटितजीवनः पातु नः ।। ६९ ।।

स्वजातकुसुमस्रजामसम भावलावण्यकु-
न्मुरारिमुखदृक् पदाम्बुजसमुच्छ्च्छ्रीलवम् ।
अवाप्तुमिवमाधवाननविलोचनांघ्रिद्वय-
क्रमभ्रमण[2] विभ्रमं प्रियमदभ्रमम्भः क्रियात् ।। ७० ।।

मुखेन्दुमथ लोचनं स्वसुतवैरिभावान्निजा-
धिपाभरणलोहितोपलकुलश्रियो लुण्ठनात् ।
स्वशैत्यविजयाद्रवच्छदहृदोश्च सोमेत्यज-
ङ्घ्रजङ्घ्रुवनपावनं चरणमम्बु[3]विष्णोर्जयेत् ।। ७१ ।।

बहन्तमलमम्बुदं स्वबहनाधिकस्निग्धतां
पपौ दलितकालियो ललितकालिमाडम्बरैः ।
रुषेत्यपनयात्पयोजनयनस्य नैल्यं मुहुः
पयो जनयतु प्रियाण्यनय तुष्टिभाजो मम ।। ७२ ।।

निपीय वदनाम्बुजोदरमरन्दवृन्दं हरेः
पदाब्जमधुलालसागतमिलिन्दमाला किमु ।
विधौतमुखवर्णकैः शितिपुषां पयो विप्रुषां-
तति सपदि पातु काचन कृपालुतः पातुका ।। ७३ ।।

१ । महासमाल्हाद   २ । क्रमक्रमण   ३ । चरणामम्बु

जगत्त्रितयचित्तमोहनमनूपदेशाय किं
कपोलतलचुम्बिन: कति च केचन श्रीपते: ।
विलोचन पिधायका: किमति लुण्ठनाय श्रियां
दिशन्तु[1] मदनामयं वदनवारिपूरा हरे: ॥ ७४ ॥

क्वचिद्द्रुतगतिश्रियो हृदयचौर्य्यभीता इव[2]
क्वचित्स्थिरतरो जगन्नयनरुद्धमार्गा इव ।
दिशन्तु मम सन्ततं स्खलनशोभिताम्भोधिजा-
धवास्य शरदिन्दव: कुशलमम्भसां विन्दव: ॥ ७५ ॥

लसद्वहनदामसंनहनयन्त्रणा[3]नर्गल-
स्खलत्कमललोचनाननसुधांशुपीयूषवत् ।
मिलन्मलयसम्भवद्रवकदम्बवल्गुच्छवि-
च्छिनत्तु दुरितामयं किमपि वारिधारामयम् ॥ ७६ ॥

विलोचनविलुण्ठितामृतमुखालयो[4]द्घाटना-
तटद्वयनटद्विष'कटकवाटयुग्मोपमाम् ।
भजाम्यभिषवोत्सवोत्तरतरङ्गिकेलीकरि-
क्रियस्य कमलाकरग्रहकरस्य कर्णद्वयोम् ॥ ७७ ॥

घन: क्व गतमात्मनो मदमदभ्रमाहृतवान्
परेतसदृशि द्युतौ प्रतिकरोऽति पाथोरुहम् ।
रसातलगतं विधुमंधुरिमाणमाकृष्टवा-
न्यदङ्गनयनाननावरणत: स्वपन् पातु स: ॥ ७८ ॥

अखण्डसुखसम्पदा नयनयो: शितिक्ष्माधर-
स्थलीसुषमया निशारतिगुरोर्विषादश्रिया ।
समं समदमुत्थित: प्रभुरभूतपूर्व'क्रियात्-
कृपाविपुलसंपुटप्रतिमदृष्टिरिष्टं मम ॥ ७९ ॥

---

१ । दिगन्तु
२ । तव
३ । हनयन्तुणा
४ । मुखानयो

प्लवत्प्रवररामणीयक इवाभिलुग्योत्थितं
सुधामयमरीचिमण्डलपिचिण्डमध्यात्किमु ।
घनप्रमदममंतः[1] किमु समुद्धृतं शर्म त-
त्करोतु करुणानिधेरभिनवाक्षियुग्मं मम ॥ ८० ॥

अनादृतजगत्स्थितेर्निजरथैकवासोद्वल-
त्कलेश्च रुचिसन्तते स्वरथसंनिवेशावनीम् ।
विमृश्य विभजद्ध्रुवं रथतटभ्रमीविभ्रमो
क्रियान्मुहुरदभ्रमिष्टचयमभ्रमित[2] महः ॥ ८१ ॥

मनोवचनयोगिचिन्तनपरिच्युतश्रीधरा-
धिरोहणमहोत्सवोन्नतिनिमित्ततां दर्शयन् ।
तुलामुचि रुचिच्छटापटिमनि[3] क्रियात्पातक-
व्यथाहर रथाङ्गभृन्मम मनोरथान्श्लथान् ॥ ८२ ॥

रथो मुरहरत्विषा विकसतो विलासेन सा
सलोचनचयेन सत्प्रमदसम्भवेनाम्भसा ।
तदप्यमितवीचिभिर्गहनता जगाहे यतः
स तर्पयतु दर्पहृत्कलिमलस्य कोऽपि क्षणः ॥ ८३ ॥

स्वकीय सुरनिम्नगाप्रभृतितीर्थराजि नृपा-
भिषेकमुकुटं शिरस्यशितशैलचूडामणिम् ।
अघोऽप्यमरधारणी मुकुटधाटिकामावह-
द्रथापरिपरिस्फुटं किमपि पीठमन्तर्भजे[4] ॥ ८४ ॥

हरेर्यदभवत्त्विषां भुवि तदेव तादृक् पुन-
र्वदेन्ननु वदेन्नतद्यदभवद्रथारोहणे ।
विलोचनचयो रथोपरि बभूव यत्तच्च किं
शुभानि यदिदंविधं तदनिशं विधत्तां महः ॥ ८५ ॥

---

१ । ममंदः
२ । मित्रं
३ । च्छटामनि
४ । मन्त्रदंधे

किमु द्रवमयो सुधा न धवलाकृतिश्चन्द्रिका
न बिन्दुपतनान्विता प्रमदवृष्टिरत्युन्नता ।
शताङ्गमधिरोहतः स्फुरतु कापि केलौ मन-
स्तटे वटविटप्यधः स्फुटकुटीनटस्य प्रभोः ॥ ৮৬ ॥

विकीर्ण इव कुत्रचित्क्वचन दुर्मदोर्मिक्रमः
क्वच स्तवकबन्धुरः क्वचन पूरधौरेयकः ।
क्वच प्रबलवृष्टिमान्मुहुरुदेति यात्रोत्सवः
स चक्रधर चक्रचंक्रमणकेलिकालोऽवतात् ॥ ৮৭ ॥

स्थिरश्रवणदिग्गजव्रजकपोलदानापगा-
वगाहगतसम्भ्रम भ्रमरवाञ्छितश्रेयसीम् ।
भुजङ्गजगदम्बरावरणदुर्दमाडम्बरां
भजामि हरिचक्रि चंक्रमणघुंक्रियाघोषणाम् ॥ ৮৮ ॥

किमु स्वमयविद्रवद्दुरित वर्गमार्गं दद-
द्दलेन दलयन्नलं नलिनजाण्डभाण्डोदरम् ।
समुद्गतघनाघनध्वनिनियुद्धबद्धादर-
स्त्रिविक्रमरथारवः श्रवणसीम्नि विश्राम्यतु[1] ॥ ৮৯ ॥

अदभ्यदुदधेस्तटीनिकटजन्मजन्मावली
शिरः सुजनजन्मनापदमदायि दक्पाटवम् ।
पुनर्यदभवन्न तद्वचसि यत्समारम्भणे
स चक्रिगमनक्रमः कमलचक्षुषो रक्षतात् ॥ ৯০ ॥

जहाति जननीमनोनयनरञ्जरत्नं शिशुं
शिशुर्जननी न स्तनेऽर्पयति चित्तवृत्ति मनाक्[2] ।
प्रियस्त्यजति वल्लभामपि च वल्लभोऽपि प्रियं
रथे चलति यत्र नः सृजतु रक्षणं स क्षणः ॥ ৯১ ॥

---

১ । विश्रामतु   २ । Two lines are not in the mss.

विनिर्मितवदुत्सवैः परमसम्मदैः सूतव[१]-
द्विभूषितवदद्भुतैः समुपलिप्तवत्कौतुकैः ।
करिष्यति कदा दृशोरमृतसेचनं मेचका-
चलाधरकलानिधे रथविहारकालो मम ॥ ९२ ॥

अखण्डमहिमाभुवो भरतखण्डसीमास्पदः
पयः पतिततटोभुवः सुकृतनिःसपत्नोदयः ।
पुनर्जनजनुजुषां किमपि वैभवं चक्षुषां
हरेः स्फुरतु मानसे मम स कोऽपि यात्रोत्सवः ॥ ९३ ॥

अहिस्थलतलावहि[२] न हि महोजनैर्विक्रिया[३]
जयध्वनिभिरस्फुटं गगनमेव यस्या यशः ।
मनः सदनमस्तु नो[४] नदनरेन्द्रवेलावनी-
वनीभवनवासिनः सरभसक्षणः सक्षणः ॥ ९४ ॥

कुलोद्भवकलावतीजनपरिभ्रमः सत्क्रिया-
कथा रथमहश्लथा यदि च सा पशुव्यापृतिः ।
चिरातुरजरावतामपि हि मन्दतादूषणं
यतः स तनुतां शुभं वनजनेत्रयात्रोत्सवः ॥ ९५ ॥

विपन्मुखममुद्रय[५]द्ववजमपातयत्पातकं
सवेद[६]मुदसारयत्परिकरं गदानां गताः[७] ।
रहस्युदवहन्मुहुः किमपि[८] मन्त्रमन्तर्व्यथा
जने यमनुयातुमिच्छति हरेः स पायान्महः ॥ ९६ ॥

समं निजगृहाङ्गणद्रुमफलेन निःश्रेयसं[९]
विरञ्चिपदवीकटी[१०] कनकवद्विभोजः पदम् ।
मुखोदरचरत्सुधा कवलवन्महापापिनां
ययाजनि भयानि सा हरतु कापि यात्रा हरेः ॥ ९७ ॥

---

१ । स्पूतिव
२ । तलाद्वहि
३ । विक्रिया
४ । मस्त नो
५ । समूदय
६ । सवेग
७ । गणः
८ । कमपि
९ । निः श्वेयसं
१० । नटी

रथस्थित[1]मुकुन्दसुन्दरमुखेन्दुसन्दर्शन-
प्रवाहविरहादिव स्वरवर्कतवार्त्तस्वना ।
लुठत्यपि च तिष्ठति क्वच शुचातिमोहेन या
न यातु मम सा विलोचनपथाद्रथाङ्गावली[2] ॥ ९८ ॥

नितान्तपतिता इति प्रथमतः प्रभूतप्रथा
रथाङ्गिपदभावतः सुगतयो भवामो वयम् ।
इति प्रतिदिशं[3] घनस्तनितकैतवेन ब्रुव-
द्रुजे मधुमथो रथोच्चलितचक्रचक्रं हृदि ॥ ९९ ॥

मुकुन्दपदचुम्बनान्निगमशूलिमौलीन्दिरा-
कुचार्कतनयातटी मुनिमनः सभाध्यासिनि ।
अनेक सुकृतश्रिया नयनयोर्विहारक्रिया
भविष्यति कदा रथे मम पृथाभुवः सारथेः ॥ १०० ॥

सुखैर्ननु तनूततेर्मनुजनुः सपूर्हृदिशां
मुरारिमुखमाधुरीझरभरैश्च यस्मिन् दशाम् ।
भिदा न किमहो महोऽवतु विलासहासप्रभा
प्रवालमणिदोलिकानिभरदच्छदस्य प्रभोः ॥ १०१ ॥

पतिः पतितसौहृदो मयि पिताऽपि तादृक् सुतः
सुतप्तहृदयोदयोद्गमहिमा हि माता न मे ।
मनः श्वशुरयोरयोमयति केवलं मे बलं
भवानिति कया गदी गदितयातना[4] पातु नः ॥ १०२ ॥

चमूकरिणि मन्दता क्वचन रागभङ्गोद्गमः
सुगीतिषु नभः पतत्कुसुमकेष्वनुत्कण्ठताम् ।
शताङ्गचरणेष्वधो गतिरियं विधा यत्र त-
द्धुनक्तु भवपीडनं मधुमथो रथक्रीडनम् ॥ १०३ ॥

---

१ । रथस्थिति
२ । रथाङ्गवनी
३ । प्रतिजनं
४ । तयातुनः

रथप्रवरमेदिनीधरतलावनीसम्भव-
न्नवीनवन[१]लेखिकावलिकलिप्रभाविप्रभाः ।
जनास्तनुजिताञ्जनाः[२] कलितरज्जवो यत्र तं
शताङ्गमसतां गतेः स्मरतु चित्तमत्युत्सुकम् ॥ १०४ ॥

अनर्गलवलेन यन्मधुरिमा चतुर्दिक्तटीः
प्रपूरयितुमुत्सुको क्षरचतुष्टयं पुष्टयन् ।
तड़िद्द्युतिविड़म्बकृद्वसनपट्टिकाकैतवा-
द्ददातु मुदमिन्दिराहृदयचन्दन[३]स्पन्दनः ॥ १०५ ॥

इदंविधविलासिनीत्यहृदयत्वमत्युन्नतं
नितान्तमहतीति चेद्वहति रम्यता ग्राम्यताम् ।
शिरः शिखरलम्बिनीत्यनुभवापलापः कथं
रथं श्रितवतो गतिं प्रमदसन्ततिर्वर्ण्यते ॥ १०६ ॥

मनांसि सुषमा स माधवरथोत्तमस्तामथो
जनस्तमति तत्पुनः[४] प्रमद सिन्धुवीचीरयः ।
चकर्ष नितरामतो जयति यत्प्रकर्षोदयः
स नः सृजतु गुच्छवत्कुशलमुत्सवः श्रीहरेः ॥ १०७ ॥

जगद्विजयमञ्जिमोत्करवरोपलब्धिर्नव-
प्रसूनशरचातुरी परिणतिर्गुणानां जयः
स यत्र तरुणीगणः प्रणयपूर्णलोलापणः
स नोऽस्तु कृतरक्षणः सरसिजेक्षणस्य क्षणः ॥ १०८ ॥

दया मधुरिमामृतप्रमदभुक्तिमुक्तिश्रियां
परस्परपुरो विनिःसरणसम्भ्रमाड़म्बरः ।
मुहुर्जयति यत्र नो हृदि भवन्तु ताः संकटाः
फटाधरपतेः फटानटनकृत्कटाक्षच्छटाः ॥ १०९ ॥

---

१ । नवीननव
२ । जिञ्जनाः
३ । नन्दन
४ । तं पुनः

अपाङ्गतटरिङ्गणस्मितवचांसि वामभ्रुवोऽ-
नुगच्छति यथा यथा कुलभुवस्तपा[1] चातुरी ।
कपालि कमलाश्रिता ननु तथा तथा लोलया-
नुगच्छति यदीयदृक् द्यतु मदीयदुःखानि सः ॥ ११० ॥

स्पृशन्नमरमण्डलीं प्रमथनाथसंघट्टितो
रमास्यपरिरम्भकृद्भुजनभाजि मज्जन्मुहुः ।
अनाथजनसन्ततौ विहित सोवनश्रोवन-
प्रभूतनयनस्य पश्यतु स मां दृगन्तः कदा ॥ १११ ॥

मिलन्नखिलमङ्गला[2]वलिनिवाससीमार्पणा-
मथश्चरणयोर्दधत्प्रपदचर्वितोर्वीतलम् ।
यदीय नुकुलं क्वचिन्मुरहराननश्रीसुधा-
नुधावि नयनं दयाजलधिमन्दयानं भजे ॥ ११२ ॥

अखण्डमणिमण्डल[3]त्विषि करावलम्बद्विष-
द्दिशो हसदनेहसोऽपि च सहायभावं मुहुः ।
किमीह विकस[4]न्मनोनयनमुल्लसद्दुर्लभं
रमारमणरामणीयकमहर्निशं भावयेत् ॥ ११३ ॥

निराकृतपुराकृत प्रचुर पातकान्तः पुनः
प्रवेश विनिवारकार्गलयुगाभबाहुद्वयम्[5] ।
क्वचावचितपुण्यपादपफला इवोद्वर्वोलस-
द्भुजा यदवलोकिनः क्वचन धाम तत्कामये ॥ ११४ ॥

कियद्गमनमुद्गताननलता[6] यदा संकटा
धरा यदि जरा[7] दिशः क्वचन पुञ्जदीपत्विषः ।
ततादिविततारवं यदि जगत्कृशं किं सखे
ब्रवीमि मुरजिद्दिनात्ययशताङ्गयात्रा श्रियः ॥ ११५ ॥

---

१ । भुवस्तुपा
२ । मिलन्निखिलमङ्गना
३ । मण्डन
४ । विकसो
५ । बाहुद्वयः
६ । तानन‌लता
७ । नरा

अनादिमृदुमर्दलैरथविहारि तादृङ्महो
मुदं हृदयमस्त्र¹वन्नयनयोर्युगं तादृशम् ।
अपायि पुरुषैर्दिशां कुलमहं च यस्मिंस्तथा
स कोऽपि समयः समुत्सवमयः प्रियाणि क्रियात् ॥ ११६ ॥

पिचिण्डपरिपूरकाधिकनिपीतपीताम्बरा-
ननद्युतिसुधाबहिर्गमभियेव बद्धानना ।
सरोरुहमयी स्वनर्त्तनमनोजरूपालका²
हरेरलकपालिका भवतु पालिका मादृशाम् ॥ ११७ ॥

॥ इति गुण्डिचाशतकं³ सम्पूर्णम् ॥

१ । हृदयमम्बु
२ । रूपालिका
३ । चम्पू

हरिभक्तिसर्वस्वशतकम्

हरिभक्तिसर्वस्वशतकम्

श्रीकृष्णाय नमः

अथ श्रवणभक्तिः —

निर्णीतामघमर्णमेष विषदां त्वां वर्णये प्रार्थना
यद्वर्णं समुदीर्णमिच्छसि सुखात्तन्मे वचः पूर्णय ।
दुर्वर्णग्रहलब्धवर्णकुशलैरभ्यर्णतो वर्णितं
कर्णाकर्णय नारीवर्णयुगलं कृष्णेति सौख्यार्णवम् ॥ १ ॥

याः सर्वा विदिशो दिशः समुदितास्ताभ्यो नमो वः सदा
संसारार्णवभीरुके मयि मुधा भ्रातः[1] कुरुध्वं कृपाम् ।
युष्मत्प्रेष्यमिमं मदीयमधमं कर्णं नियुक्तोल्लस-
द्गोविन्दामलकीर्त्ति संश्रुतिविधौ धौतो यथा स्यामहम् ॥ २ ॥

ये गर्त्तानि वसन्ति भित्तितटके क्षोणीरुहाणां कुले
या वा क्रोटरसंततिः पदविदः कर्णास्तिरश्चां च ये ।
श्रीवृन्दावनचन्द्रसुन्दरकथा पीयूषपाने स्पृहां
श्रोत्रत्वं न दधासि चेत्तदिहते तेभ्यो विशेषोऽस्ति कः ॥ ३ ॥

किं ते तानि निशम्य हे श्रवणजे[2]रन्तर्विशुद्धिः क्रमा-
न्नश्मं स्यादधिकं वपुर्मम जलैः पात्रं सरन्ध्रं यथा ।
यच्छ्रुत्वा भववारिधेः सुखतरं पारं प्रयास्याम्यहं
तन्नित्य श्रृणु केशवानुचरितं संसारसारं परम् ॥ ४ ॥

याश्चक्षुःश्रवसां महोपचितयो या भूपतीनां श्रियो
देवीनां त्रिदिवे[3] नितान्तसुखिनां याः संपदो दुर्लभाः ।
ईशा ये विधिशङ्करप्रभृतयस्तेषां च या भूतय-
स्ताः सर्वा हरिकीर्त्तिसंश्रुतमुदो नार्हन्ति दान्तं कलाम् ॥ ५ ॥

१। भ्रातन्त   २। श्रवणयै   ३। तिदिवे

सद्भिः संसदि सादरं मधुरिपोः संकीर्त्यमाना कथा
स्वच्छन्दं पुलकाश्रुवारिवपुषां यः शृण्वतां जायते ।
आनन्दं तमिहास्ति कस्य गदितं शक्तिः सुखभ्रान्तिदा
यन्मग्ना न विदन्ति मूढ़रसना संसारवार्त्तामपि ॥ ६ ॥

साङ्गा वेदगणाः सहोपनिषदो[1] वाचस्तदर्थ स्पृश-
स्तर्कादीन्यनुशासनानि च पुरावृत्तं पुराणानि च ।
सर्वेभ्यः फलमेतदेव गलितं यत्कर्णपातैः सदा
श्रीमत्सुन्दरनन्दनन्दनयशः सानन्द मां पायते ॥ ७ ॥

सेवन्तां सुजना गणाधिपमथो दुर्गां मुदोपासतां
यज्ञैर्देवगणान्यजन्तु विविधं कर्मारभन्तामपि ।
किन्त्विच्छन्तु फलं तदेव नियतं सर्वाभिराद्योद्यमै-
र्जीवामि प्रतिजन्मशौरिचरितश्रुत्युत्सवेनेति यत् ॥ ८ ॥

येषां पाप नयच्छिदे सुरसरित्तोये समुन्नं शिरो
नानातीर्थगतिश्रमानुभवने यैरङ्घ्रियुग्मं कृतम् ।
यैस्त्यक्तं न कलेवरं पुरवरे वाराणसीपत्तने
तेषामेव हि जायते मुररिपोर्लीलाश्रवे संस्पृहा ॥ ९ ॥

हे विश्वेश्वर हे कृपाजलनिधे हे दीनचिन्तामणे
हे गोपीसुत हे चराचरपते हे नाथरामानुज ।
हे गोविन्द विधेहि मय्यपि हरे भृत्यानुकम्पां प्रभो
नित्यं गच्छतु[2] ते यशः समुदितं संशृण्वतो मे वयः ॥ १० ॥

अथ कीर्त्तनभक्तिः —

जिह्वे व्यर्थनिबन्धवादरसिके विज्ञापना श्रूयतां
सार्थां नामरसज्ञतां यदि निजां वाञ्छस्यमुत्रेह च ।
तत्तावद्यदुनाथगोकुलपते गोपालचूडामणे
गोपीवल्लभ गोकृपाकरविभो गोविन्द चेत्थं रट ॥ ११ ॥

१। सहोपनिषदो   २। गच्छति

यस्त्वं पश्चिमदिक्पतिर्जलपति यादःपतिः पाशभृ-
त्तं त्वाहं[१] शरणं गतो मयि विभो दीनेऽनुकम्पां कुरु ।
त्वद्दूतस्त्वां रसनामिमां मम तथा संप्रेषय प्रत्यहं
श्रीविष्णोर्मधुरां मनोहरतरां कीर्तिं यथा कीर्त्तये ॥ १२ ॥

हे जिह्वे किमु नाह्वयस्यतितरां हे कृष्ण रामेत्यहो
त्वं मूढे[२] प्रतिपादिताखिलकृतानासद्ग्रहीत्तं वचः ।
किन्तु श्रीमधुसूदनस्य विषदं पुण्यं यशः कीर्त्तये-
त्तत्किं मां विनिमज्जयस्यधिभवाम्भोधिप्रतीपेच्छया ॥ १३ ॥

यान्यन्नानि चतुर्विधानि रसवन्त्यामोदपूर्णानि य-
न्माध्वीकं मधुरं सुरी दत्तरं यच्चामृतं स्वर्गतम् ।
हे मूढे रसने वृथारसपरे जानीहि नालं भवे-
त्तत्सर्वं हरिकीर्त्तिकीर्त्तनरसानन्दस्य दान्तं कलाम् ॥ १४ ॥

किं ते तेन रसेन सादरभरं प्रस्वादितेनाधमे
जिह्वे येन हठादहं मृतिकरं मीनो यथा प्राप्नुयाम् ।
यं त्वास्वाद्य भृशं ददामि चरणं वाञ्छामृतेमस्तके
तं नास्वादयसीह[३] किं नु भगवल्लीलारसं नित्यशः ॥ १५ ॥

हे कल्याणि सरस्वतीविलसिते भव्ये रसज्ञे प्रिये
त्वां बद्धाञ्जलिमान्तरान्तरमना याचे त्वमित्याह्वय ।
हे नक्रायुध हे चराचरगुरो हे नाकलीलानिधे
हे चन्द्रेक्षण हे चतुर्भुज चिरं चित्ते प्रसीद प्रभो ॥ १६ ॥

व्यर्थालापशतं करोष्यविरतं तीक्ष्णं समं दुर्जनै-
र्हे पापार्जनतत्परे नहि पुनर्जिह्वे भृशं बुध्यसे[४] ।
कालाशो विषदष्ट[५] जीवनविधेर्मन्त्रस्य विश्वश्रुतः[६]
पीयूषस्य हरीति वर्णयुगलस्याभ्यासतः कः श्रमः ॥ १७ ॥

---

१ । त्वांहं
२ । त्वं मूढ
३ । आस्वादयसाह
४ । न यनिसे
५ । दंशने
६ । विश्वश्रुते

यद्वेदाध्ययनं निरन्तरमथो यच्चागमालोचनं
यद्ज्ञानं ललितं यदेव वचसां चातुर्य[1]मुच्चारितम् ।
श्रीगोविन्दविलासकीर्त्तनविधौ श्रद्धां समृद्धां विना
तत्सर्वं श्रम एव केवलमहो नान्यततो लभ्यते ॥ १८ ॥

मन्ये कालसरीसृपस्य रसने त्वं माधवाकीर्त्तना-
च्छिद्रान्वेषणतत्परा मम पुनर्वंजान्तरे वर्त्तसे ।
यस्यादाह्वयतः प्रतिक्षणमलं दीनस्य न त्वं शृणो-
ष्येतस्येव मुखान्तरं किल बलान्मां प्रापयस्युन्मदे ॥ १९ ॥

हे दीनार्त्तिहरावतारक हरे त्वद्भृत्यभृत्यानुगं
लीलापाङ्गविलोकनस्य विषयं मां वारमात्रं कुरु ।
नित्यं कीर्त्तयतस्तवामलयशो नेत्राम्बु संमुञ्चतो
देहो मे पतताद्दयाजलनिधे तीर्थे श्मशानेऽपि वा ॥ २० ॥

अथ स्मरणभक्तिः —

कंसे मानस साहसे न विषयग्रासे न लाभो भवे-
देतन्मे कृपणस्य काकुवचनं सश्रद्धमाश्रूयताम् ।
विश्वव्यभ प्रसरं विहाय विषमं सर्वेन्द्रियस्वामिनं
चिन्ताधिष्ठितमीश्वरं सुरगुरुं श्रीवासुदेवं स्मर ॥ २१ ॥

शीतांशोपरितप्तजीवनविधौ त्वं लब्धकीर्त्तिः सदा
तत्संतप्ततरे कथं मयि विधो नैवानुकम्पां गतः ।
श्रीकृष्णांघ्रिसरोरुह स्मृतिसुखं विस्मृत्य विश्वग्व्रज
त्वद्वश्यं न नियच्छसि प्रतिदिनं यन्मे मनः प्रोन्मदम् ॥ २२ ॥

आजद्वीपयुगं गुहान्धविवरभ्रान्ताध्वसंदर्शने
सर्वेषामभिलाषपूरणविधौ कल्पद्रुमद्वन्द्वकम् ।
उन्मीलद्भवतापसंचय हरश्वेतातपत्रद्वयं
चेतश्चिन्तय चारुकृष्णचरणाम्भोजन्मयुग्मं चिरम् ॥ २३ ॥

---

१ । गत्तुर्य्यं

नाभूद्भूरिधनप्रिया न वशगा पुत्रो न चाज्ञाकरो
बन्धूर्नातिमहितप्रदः किमधुना भूयो विधास्याम्यहम् ।
नेत्थं कातरतामुपैतिमुचितं चेतः स्मर श्रीधरं
निर्द्वन्द्वं स विभुर्विधास्यति पुनर्यत्ते भवेन्मङ्गलम् ॥ २४ ॥

रेरे मानस पापसाहसभृशं हास्यास्पदं भूतले
यत्संकल्पशतं करोष्यविरतं नास्त्येकतस्तत्फलम् ।
एकस्मिन्हरिपादपङ्कजयुगध्यानेऽपि संकल्पिते
सर्वाण्येव फलानि सन्ति न पुनर्यत्सर्वथा बुध्यसे ॥ २५ ॥

मित्रापत्यकलत्रबन्धुसुहृदां यः सङ्गभाज्जायते
तस्मै स्वान्त निरन्तरं किमु मुधा नन्दाय संधावसि ।
सर्वस्मिन्सुलभो यतोऽयमथ यो नान्यस्तु संलभ्यते
तस्मै कृष्णपदाम्बुजस्मृतिभवानन्दाय यत्नं कुरु ॥ २६ ॥

नीलाम्भोधरसुन्दरं प्रविलसत्पीताम्बराडम्बरं
सुस्निग्धस्य सुधाकरं स्मितजयद्बिम्बाधरं मेदुरम् ।
नानाभूषणभासुरं जितजगल्लावण्यशोभाकरं
फुल्लाम्भोरुहचारुलोचनधरं चेतः स्मर श्रीधरम् ॥ २७ ॥

स्नात्वाचम्य शुचिः समस्तविषयात्प्रत्याहरन्निन्द्रिया-
ण्यासीनः परमासने समुचिते नासाग्रदत्तेक्षणम् ।
प्राणायामविधेरनन्तरमधिस्वान्तं मुकुन्दं स्मर-
न्यो नानन्दति तस्य देहधरणं भारः पृथिव्याः परम् ॥ २८ ॥

यः कृष्णाङ्घ्रिसरोजसंस्कृतिमुदानिद्रायमाणेक्षणो
माद्यन्नान्यदवैति किंचन सुरामत्तो यथा स्वांशुकम् ।
तस्याङ्घ्रिस्खलितेन धूलिकणकेनार्हत्यहो तुल्यतां
आब्रह्मपदं सुरासुरगणैः संस्तूयमानं सदा ॥ २९ ॥

हे विश्वेश्वर विश्वपालकविभो विश्वात्मकप्रेयसां
प्रीत्यै स्वीकृतविग्रहश्रमहर श्लोकानुजानीहि माम् ।
नित्यं त्वत्पदपङ्कजस्मृतिभवानन्देन संमाद्यत
श्च्योतन्नेत्रजलस्य विष्वगुदयद्रोम्णो वयो व्येतु मे ।। ३० ।।

अथ सेवनभक्तिः —

हे मूढाः परमार्थबोधरहितस्वान्ता जनाः श्रूयतां
वृत्तिं संवहतीश्वरे स्वयमहो भूयः प्रयासेन किम् ।
यत्संसारसमुद्रपारगमनोपायः समालोच्यते
तत्सेवध्वमनुक्षणं मुररिपोः पादाम्बुजमद्वयम् ।। ३१ ।।

सर्वार्थस्रवणाश्रयं निजजनप्रक्लेशविध्वंसनं
सद्भिर्योगपथस्थितैरपि भृशं संसेव्यमानं हृदि ।
ब्रह्मेन्द्रादिकिरीटकोटिविलसद्रत्नांशुपूरस्फुर-
त्पीठं कृष्णपदारविन्दयुगलं नित्यं भजध्वं बुधाः ।। ३२ ।।

यस्यालोचनकोणवीक्षणकृते देवासुराद्या भृशं
क्लिश्यन्ति प्रयतास्तपः प्रभृतिः संपत्समृद्ध्याशया: ।
सा लक्ष्मीः सततं स्वदोषहतये यत्सेवते निश्चला
तद्दामोदरपादपल्लवयुगं को नाश्रयेत्पण्डितः ।। ३३ ।।

यद्भक्ता विवशाः श्वसन्त्यपि ततः कार्यं परस्येक्ष्यते
यज्जीवन्ति महीरुहास्तनुभृतां वृत्तिश्च तस्मादपि ।
येऽनाश्रित्य हरेः पदाम्बुजयुगच्छायां श्वसन्तः सदा
जीवन्ति क्षितिभारतः परमहो तेभ्यः किमालभ्यते ।। ३४ ।।

भार्या मे प्रियवादिनी शिशुरयं पुत्रकलं भाषते
वित्तं संचितमेतदस्ति सदने सम्यक्सदाहं सुखी ।
इत्यन्धा न भजन्ति ये मधुरिपोः पादाम्बुजं दुर्भगा-
स्तेषां सूकरकुक्कुराद्यधिगतं सौख्यं नचान्यत्परम् ।। ३५ ।।

कर्ता यस्य विपद्यते किल फलाप्राप्तावपि क्लेशतः
सिद्धं वापि फलं च यस्य पततां कालासिनाच्छिद्यते ।
तस्मिन्भूरि विकर्मणि प्रयतते लोको वृथायं पशु
र्निर्विघ्ने हरिपादपद्मभजने सर्वार्थमूले नतिः ॥ ३६ ॥

यैर्लब्ध्वं भुवि मानुषं वपुरिदं कल्याङ्कं नाश्रितं
श्रीगोविन्दपदारविन्दयुगलं तानेव शोचाम्यहम् ।
यद्येता यमकिंकराः प्रतिभया¹ बध्वा दृढं स्नायुभि²-
र्नेष्यन्ति प्रतिघोरपारनरकं तत्किं करिष्यन्त्यमो ॥ ३७ ॥

हे मूढाः क्षणभङ्गुरे भवसुखेऽप्येकान्तमास्थां गता
दीनस्यार्त्तितरस्य मे विलपतो गृह्णीतविज्ञापनाम् ।
जाग्रत्कालकरालसर्पजठरे यावन्न पातो भृशं
तावत्कंसनिसूदनांघ्रिकमलं लम्बध्वमालम्बनम् ॥ ३८ ॥

ये धर्मा मुनिभिर्मनोज्ञवचनैर्वर्णाश्रमाणां स्मृता-
स्ते शौरेः पदपद्मसेवनमृतेनालं नृणां शुद्धये ।
इत्यालोच्य चिराय नारदवसुप्रह्लादमुख्याः पुरा
विष्णोर्वैष्णवपुङ्गवाः समभजन्नेकान्तमङ्घ्र्यम्बुजे ॥ ३९ ॥

हे दामोदर हे दयाजलनिधे हे दीनबन्धो विभो
हे दारिद्र्यदाह हे दनुसुत हे प्रध्वंस हे दैवत ।
दीने मय्यतिदुःखपीड़िततरेऽनुक्रोशमाविष्कुरु
श्रद्धां धारयमो तवैव नियतां पादाब्जससेवने ॥ ४० ॥

अर्चार्चनभक्तिः —

हे पाणिद्वयकर्मकर्त्तुमसृजन्त्वां कर्मठं विश्वकृ-
त्कर्त्तव्ये सति तत्र यत्समुचितं तत्कर्ममच्छूयताम् ।
भूभारावतरेच्छयात्तवपुषो विश्वेश्वरैरर्चिता-
मर्चामर्चय चक्रशङ्ख विलसत्पाणेः कृपाब्धेर्विधोः ॥ ४१ ॥

१। भयङ्करं प्रति २। चर्मारजु

हे वज्रायुध सर्वनिर्जरपते त्वां पादपद्मे पत
न गम्यान्तरचेतनः सकृदहो विक्रोशनं मे शृणु ।
त्वत्प्रेष्यावति दुर्भगो मम करावेतौ नियुज्य स्फुर-
द्गोविन्दप्रतिमासमर्चनविधौ यास्यामि शुद्धिं यथा ।। ४२ ।।

येऽनाराध्यलतानुरूपफलदा हृत्ता परा देवता-
स्तोथ्यं व्याप्य निषेव्य दुर्जभफलानीच्छन्ति सिद्धिं पराम् ।
ते भक्त्यन्वितमानसा मुररिपोः पादाब्जपीठं परं[1]
सर्वस्वार्थकलाविलासवसतिं[2] संपूजयन्त्या रताः ।। ४३ ।।

यः पूजां मुरवैरिणः सुखसमारम्भामशेषप्रदां
हित्वानन्दपरीष्टया विनिगलद् विण्मूत्रपूरेऽनिशम् ।
विलग्नस्त्रीवणके कुचायितलसन्मांसोच्चयान्धीकृतो[3]
भ्राम्यत्यस्य क्रमेण भूरि कलनान्नैवान्तरं दृश्यते ।। ४४ ।।

किं तीर्थैर्बहुभिः किमन्यनियमैः किं कर्मभिर्भूरिभिः
किं योगैरतिदुष्करैः किमपरैरिष्टैः समाराधितैः ।
यद्भावान्वितनिर्मलेन मनसा तोयेन पुष्पेण वा
सर्वार्थोदयवेश्मनो मुररिपोर्मूर्तिः सकृत्पूजिता ।। ४५ ।।

हे विज्ञाः शृणुतोदितं मम हितं यूयं विधाय प्रभो-
र्मूर्त्तिं धातुमयीमथो मणिमयीं लेख्यां तथामृण्मयीम् ।
पाषाणीमथदारवीं किमथवा लेप्यां तथा मानसीं
शङ्खचक्रगदाम्बुजानि दधतीं श्रद्धान्विता स्वर्चिता ।। ४६ ।।

यः संपूज्य मुदा हरिं कलिमलप्रध्वंसनं श्रद्धित-
स्तत्पादाम्बुरुहोदकं प्रतिदिनं सर्वाङ्गके सिञ्चति ।
तस्याङ्घ्रिस्खलितं रजः कणिमदोवाञ्छन्ति राजच्छिरो-
भूषारत्नततेः सदासहचरीकर्त्तुं विधीशादयः ।। ४७ ।।

---

१ । पाब्जपीठीं परमिति पाठः

२ । सर्वस्वार्थकलासवसतिमिति पाठः

३ । मांसोच्चयान्दीकृतो इति पाठः

विष्णोः पादसरोजपूजनपरं संशुद्धबुद्धिं जनं
शेषेणाधिकसौरभेण सुमनोगन्धादिनाऽलंकृतम् ।
नाधिव्याधिसमृद्धयः परिभवन्त्याराल्पतन्त्यात्कटा
निर्घातप्रमुखा द्रवन्ति सहसा सर्पादयो दूरतः ॥ ४८ ॥

धन्यास्ते निपुणाश्च ते सुकृतिनस्ते त्यागशीलाश्च ते
बुद्धास्ते[1] सुखिनश्च ते सुमहितास्ते जन्मभाजश्च ते ।
येषां गोकुलनायकस्य विलसत्पादाब्जपूजाविधा-
वेकान्तं रमते मनः परिहरन्निःशेषसांसारिकम् ॥ ४९ ॥

हे नारायण दुःखवारण हरे सोदद्गजेन्द्रादिषु
त्वत्त्राणप्रदता विभो समुदिता नाच्छादनीयाद्य सा ।
तत्त्रायस्व कृपाम्बुधे परिपतत्काला हि वज्रान्तरा-
च्छ्रद्धालुं कुरु मां तवैव चरणाम्भोजन्म संपूजने ॥ ५० ॥

अथ वन्दनभक्तिः —

धीराः कर्णगतीकुरुध्वमुदितं निःश्रेयसं यत्परं
किं संक्लिश्य गृहेषु गोऽश्वखरवत्पीयूषपूरे सति ।
आनन्दोदयकन्दरं मधुरिपुं वृन्दारकैर्वन्दितं
वन्दन्तामभिनन्दिनो भव तमः प्रध्वंसनेन्दुं सदा ॥ ५१ ॥

षड् वर्गं परमं रिपुं निजतनोरन्तश्चरं दुर्जयं
जित्वा हे यदुवीर कंसमथनश्रीनाथ मामुद्धर ।
इत्युच्चैर्मदगद्गदं प्रणिगदन्यो वन्दते सुन्दरं
गोविन्दस्य पदारविन्दमभयास्तस्यैव सर्वा दिशः ॥ ५२ ॥

एकस्मादपि कृष्णचन्द्रचरणाम्भोजद्वयावन्दना-
द्योलाभो वचसामगोचरतरः प्रादुर्भवत्यद्भुतम् ।
सम्यक्साधितसर्वयज्ञनियतं प्राप्तोदयस्योपरि
भ्राम्यत्कालकुरालचक्रविघलन्मूलस्य नर्नर्त्ति सः ॥ ५३ ॥

---

१ । त्स्युद्वास्ते इति पाठः

एको यः सृजतीदमात्मकलया यश्चावति स्वेच्छया
यः प्रान्ते निखिलं निधाय जठरे शेते[1] न शेषोपरि ।
तं नारायणमादिकारणमविक्षीणं मुदा वन्दते
यस्ते नेह किमस्ति वस्तु जगतां मध्वे वतावन्दितम् ॥ ५४ ॥

किं नागाधिपसम्पदा किमिह वा साम्राज्यलाभश्रिया
किं वा सर्वसुराधिपत्यमहसा किं पारमेष्ट्येन वा ।
जन्तुश्चेच्चतुराननार्चितपदं संवन्द्यमानो हरिं
माद्यन्न तुरगाद्गदः सपुलकः सास्रेक्षणो जीवति ॥ ५५ ॥

कृत्वान्यायशतं बिभर्त्ति कुमतिर्यान् ज्ञातिबन्धुभ्रमा-
दन्ते तेऽस्य गतिं निजामुपयतः किंचिन्न कर्त्तुं क्षमाः ।
तेन श्रीमधुसूदनो हि परमो बन्धुर्गुरुश्चात्मनः
सर्वावस्थमहो विधत्ति सुजनास्तद्वन्दनं निःश्रमम्[2] ॥ ५६ ॥

नानार्थव्यसनोदकेऽतिममतावीचिच्छटासंकटे
मोहावर्त्तभयंकरे निजजनग्राहावलीसंकुले ।
घोरेऽस्मिन्भवसागरे प्रतिवहत्कालानिलप्रोच्छले
लोकानां विनिमज्जतां परमहो पोतः प्रभोर्वन्दनम् ॥ ५७ ॥

घर्माम्भोजवनश्रियं विधुरयंश्चित्ताम्बरं म्लानयन्
ज्ञानाद्रिं निगिलंस्तनुद्रुमचरैर्विच्छेदयन्पक्षिणो ।
ये व्याप्नोति जनान्निरन्तरमयं मोहान्धकारो महा-
न्गोविन्दाङ्घ्रिसरोजवन्दनमतिज्योत्स्नोदये लीयते ॥ ५८ ॥

मूढो गाढनिबद्धबुद्धिरनृते सांसारिकेऽयं जन-
स्तुच्छं कुत्सितमल्मदं प्रभुधिया हन्ताधमं वन्दते ।
आब्रह्माञ्चितपादपङ्कजरजः सौभाग्यमीड्यं परं
भक्तेष्वात्मपदप्रदं मुररिपुं सर्वोत्तमं नो पुनः ॥ ५९ ॥

१। शेते २। निःश्रयम्

हे कारुण्यरसाम्बुधे तव पदाम्भोजं प्रपद्ये प्रभो
संतप्तप्रणमप्रदानरसिकं नाथ प्रसादं कुरु ।
त्वन्नामाह्वयतस्त्वदर्पितमतेस्त्वां वन्दमानस्य मे
हेऽहो गच्छतु[१] भस्मतां किमथवाविष्टामथो कीटताम् ॥ ६० ॥

अथ दास्यभक्तिः —

लोकाः श्रोत्रपथातिथिं कुरुत मे वाणीं सुकल्याणिनीं[२]
किं स्यात्प्राकृतपूरुषस्य शमनग्रामस्य दास्ये नवः ।
यद्दास्ये पदरेणुमेव न यमः प्रष्टुं क्षमः पापिनां
शास्ता तं नरकान्तकं नरहरिं कर्त्तुं प्रभुं मृग्यत ॥ ६१ ॥

ये किं वाप्यनुभूय भूरि विभवा यद्दास्यदीक्षां गता
भार्यापत्यगृहस्वबन्धुसुहृदो मुञ्चन्ति लब्धानपि ।
दासेभ्यः किमयं ददाति भगवान्सेवासमं वेतरं
तद्दुर्वाघतरं त एव निपुणा जानान्ति सद्वैष्णवाः ॥ ६२ ॥

कुर्वन्मार्जनलेपने निवसते भित्तौ लिखंश्चित्रकं
तोयेन स्वकरोद्धृतेन सुमनोवाटीं च सिञ्चन्नपि ।
मालीचन्दनकुङ्कुमान्यपहरन्वासायते यो हरे-
स्तं विश्वे प्रणमन्ति देवनिकराः स्वार्थस्य संसिद्धये ॥ ६३ ॥

श्रीविष्णोरवतारिणः प्रतिकृतेरभ्यञ्जनं मार्जनं
वस्त्रालंकृतिचन्दनादिरचनां पादाब्जसंवाहनम् ।
कुर्वन्भावपरायणः परिचरन्यो दासशब्दं गत-
स्तेन ब्रह्मपरार्द्धमप्यसदृशं मन्दे समालोचयन् ॥ ६४ ॥

मूर्खं पण्डितो तामृजुं निपुणतां पापिष्ठमापूततां
निर्द्रव्यं धनिनां कटुं मधुरतां व्यङ्गं समग्राङ्गताम् ।
न्यूनं सर्ववरिष्ठतां प्रणयते यद्दास्यमुद्रामक ।
हित्वा तं जगदीश्वरं कमपरं सेवेत विज्ञो जनः ॥ ६५ ॥

१। हे हो गच्छन्तं

२। एकस्मादपि (श्लोक-५३तः) सुउल्याणी (श्लोक-६१)
इत्यन्तं पाठः कीटदष्टः

आश्चर्यं हरिदासभाग्यमहिमा निःसागसंवर्द्धनो
ये तुल्यं कलयन्ति शुद्धहृदयाः स्वर्णानि लोष्ठानि च ।
लोकानुग्रहतत्परेण मनसा येषां समन्तादुगति-
र्येषां पादरजः कणस्य पतनात्तीर्थानि तीर्थान्यपि ॥ ६६ ॥

श्रीमत्पादसरोजयोर्यदुपतेर्दासोऽहमेतद्वचो
व्याजेनापि वदन्प्रयाति तमसः पारं परं दुर्जनः ।
यः शुद्धान्तरमानसः परचरत्येकान्तभावाद्विभुं
तस्याशेषजनोत्तमाङ्गविलसत्पादस्य किं वर्ण्यते ॥ ६७ ॥

शान्तानुत्तम तेजसः समदृशः संसारसारग्रहान्
सर्वार्थेष्टविनिःस्पृहान्मधुरिपोर्वन्दामहे सेवकान् ।
ये व्यर्थश्रमतत्परांस्तनुभृतो वीक्ष्यानुकम्पां गताः
सेवार्थं प्रदिशन्ति तापशमनं पादाम्बुजं स्वप्रभो ॥ ६८ ॥

हे रात्रिचरवृन्ददावदहनप्रोद्दीप्तबह्नें विभो[१]
रामालोचनमीनखेलनलसल्लावण्यपूराम्बुधे ।
मां राजीवपलाशलोचनहरे त्वद्दासदासस्य यो
दासस्तस्य च यः सदा परिचरस्तस्यैव दासं कुरु[२] ॥ ७० ॥

अथ सख्यभक्तिः —

हे लोकाः शृणुत प्रियं हितमिदं संसारनिस्तारकं
किं कालास्यगतं नितान्तमधमं कृत्वा सखायं जनम् ।
यद्येकान्तसुखानुभूतिरसिकं संपद्यते वो मन-
स्तत्सख्यं सुविधत्तदुःखनिबहप्रध्वंसिना शौरिणा ॥ ७१ ॥

यो विश्वं भगवान्विभर्त्ति निखिलं विश्वेश्वरः स्वेच्छया
किं तावत्स उपेक्षते निजसुखस्यार्हं सखायं स्वकम् ।
तद्वृत्तिप्रतिपादनश्रमभरेणालं निखिद्य स्वयं
मैत्रीमेव जनाः सदा विदधतां दामोदरेणोत्तमाम् ॥ ७२ ॥

---

१ । मूलपुस्तके ६९ श्लोकस्य पाठो नास्ति ।

२ । दासस्तस्य च यः सदा विदधतां दासोपरिचर दासोपदासं कुरु इति पाठः ।

यन्नाभीह्लदजातपङ्कजभवो ब्रह्माभवविश्वकृ-
द्यत्पादाम्बुज संभवास्त्रिभुवनं गङ्गा पुनात्यम्भसा ।
यत्कीर्त्तिः सुरसन्निधावपि सुधामत्येति कर्णं गता
तस्मिन् श्रीमधुसूदने सति पुनः कः सख्यदोक्षाक्षमः ॥ ७३ ॥

शुद्धान्तःकरणः स्वकीयवसु यत्सर्वं तदस्मै दद-
त्तल्लीलाचरितश्रुतावनुभवन् दुःखं सुखं चात्मवत् ।
यो धीरः स्वनुरागवानतितरां दक्षो यथार्थं वदन्
गोविन्दस्य सखीयते किमपरं तस्यास्ति साध्यं फलम् ॥ ७४ ॥

ये गृह्णन्ति हरेः पदाम्बुजरसादन्यत्र पीयूषतां
ये जानन्ति मुकुन्दपादभजनादन्यं स्वजन्मोदयम् ।
ये वाञ्छन्ति विभोः प्रसादनविधेरन्यत्क्रियायाः फलं
ते त्वेवान्यमुपासतां सखि धिया कृष्णात्सुदुर्बुद्धयः ॥ ७५ ॥

कस्माद्विश्वमिदं भवत्यनुलयं केनानुसर्गं पुनः
सम्यक्पालितमस्ति कुत्र निलयं प्राप्नोति चान्ते मुहुः ।
इत्येतन्न विचारयन्ति पुरुषा ये ग्राम्यसंपर्कित-
स्तेषामेव हि जायते सखिमतिर्विष्णोः परस्मिन्जने ॥ ७६ ॥

ब्रह्माविश्वसृजांपतिर्गिरिसुताकान्तः पशूनां पति-
र्वृत्रारिमरुतांपतिश्च पतयो वैश्वानराद्यादिशाम् ।
ये चान्येसुरदानवाः समनुजारक्षः पिशाचोरगा-
स्ते सर्वे यमृते न सन्ति तमहो कुर्वन्तु मित्रं जनाः ॥ ७७ ॥

बल्योपि प्रपतन्ति बोधरहिताः संदर्शितेनाध्वना
तिर्यञ्चोऽपि शुकादयो विदधते शिक्षार्जितं भाषितम् ।
यच्छास्त्राणि रटन्ति संशयचयच्छेदीनि सर्वाण्यहो-
तत्सख्यं हरिणा समं पशुमतिर्गृह्णाति नायं जनः ॥ ७८ ॥

मेघश्यामतनुं तडिन्निभपटं सुस्मेरबिम्बाधरं
फुल्लाम्भोरुहलोचनं मुखरुचिप्रध्वस्तचन्द्रप्रभम् ।
संसारार्णवसंभ्रमश्रमहरं सर्वस्य विश्रामदं
धन्यामित्रतया भजन्ति सुधियः श्रीकान्तमेकान्ततः ॥ ७९ ॥

हे नाथप्रणिपत्य पादकमले याचेऽहमेकं वरं
तं दत्वा नितरां कृपालुरिति ते कीर्ति सुविस्तारय ।
यो दासस्तव तस्य यः परिचरस्तस्यापि दासस्तु यो
भृत्यस्तस्य च यः प्रभाजनयतान्मंत्रीमनेनापि मे ॥ ८० ॥

अथात्मनिवेदनभक्तिः —

धीरा धैर्यधराधरप्रमथनैः संसारवारांनिधेः
साराङ्गोदयहेतवोऽभिदधते यच्छ्रुयतां तज्जनाः ।
यस्यांशः प्रकृतिस्थितोऽतिकलिताहृत्तामतिश्चेष्टते
तत्रात्मा विनिवेद्यतां सुरगुरौ नारायणे श्रीधरे ॥ ८१ ॥

आत्मानं दयितां सुतांश्च सुहृदो वित्तं पशून्मन्दिरं
त्वद्वृत्तं न खिलं त्वय्यर्पितमिदं यान्तु प्रतिष्ठामिति ।
गोविन्दे विनिवेद्य हृद्यतिलके सर्वार्थनिर्वाहके
निश्चिन्ता विहरन्ति साधुसुधियः प्रध्वस्तभारश्रमाः ॥ ८२ ॥

केनात्मा सुखमाप्नुयान्ममसुतो गच्छेत्प्रतिष्ठां कथं
भार्या मे सुखदायिनी मयि कथं रज्येत्कुतः स्याद्धनम् ।
इत्थं मूढधियो निवेदनमृते विश्वेश्वरे स्वेच्छया
भाराक्रान्ततरा भवाम्बुधिजले मज्जन्ति नौका यथा ॥ ८३ ॥

यच्छृण्वन्ति यदामनन्ति यदलं ध्यायन्ति चार्चन्ति य-
त्सेवन्ते यदथा चरन्ति च नुतिं कुर्वन्ति यद्दासताम् ।
यत्सख्यं प्रणयन्ति सादति यदा यच्छन्ति यच्छन्ति य-
त्तत्सर्वं विनिवेदयन्ति कृतिनो विश्वात्मनि श्रीपतौ ॥ ८४ ॥

किं द्वन्द्वप्रभवैरशर्मनिकरैः संपीड्य देहं जनः
किं तं नात्मतया विमूढमतयो जानीथ यूयं हरिम् ।
यस्मान्नात्मनिवेदने सुविहिते भेदोदयस्य भवा-
द्विश्वस्यात्मतया च वीक्षणसुखान्नैवास्ति भीः शोचना ॥ ८५ ॥

योगैः सर्वमखैरनन्तनियमैर्निःशेष तीर्थाटनै-
र्विश्वेषां समुपासनैर्दिविषदां वाचां समालोचनैः ।
विश्वात्मा भगवान्प्रयाति न तथा सम्यक्प्रसादं नृणा-
मेकेनात्मनिवेदने न तु यथा सर्वोत्तमेनाध्वना ॥ ८६ ॥

केशो यस्य नभः श्रुतिर्दशदिशो नेत्रे च चन्द्रारुणौ
निश्वासः पवनो मुखं च हुतभुक्पाला दिशां दाहवः ।
पादौ भूर्द्रुमपर्वताश्च सकलालोमास्थिसर्वं चयत्
पिच्छं नास्ति परं तमेव कलय स्वात्मानमीशं मनः ॥ ८७ ॥

चेतः किं वनितामवेक्ष्य नितरां विष्वङ्नरीनृत्यसे
किं मन्ये विलसिष्यसीत्यजहतां वाञ्छां सुतुच्छामिमाम् ।
एनां कृष्णपदाम्बुजेऽर्पणमृते जानीहि मूर्द्धोपरि
न्यस्तं स्वस्य गिरिं भ्रमिश्रमवतः संसारकान्तारके ॥ ८८ ॥

यत्त्वं मानस पश्यसि प्रियतरं निःसारमात्मेतरं
मिथ्यैतद्भवरोगवर्द्धनविधौ तद्विद्ध्यपथ्यं परम् ।
भूयो येन भवेन्न जन्ममरणक्लेशो विशेषोल्वण-
स्तत्सर्वार्थसमर्पणं मुररिपौ कर्त्तुं यतस्वानिशम् ॥ ८९ ॥

हे वृन्दारकवृन्दवन्दितपदद्वन्द्वारविन्देक्षण-
क्षीणप्राणिपरायणप्रभुपदप्रावेशनैकास्य च ।
हे श्रीकान्तनितान्तसंतपहतस्वान्ते प्रशान्तिं विभो
मय्याधेहि निवेदयामि न खिलं त्वय्येव नाथे यथा ॥ ९० ॥

अथ प्रेमलक्षणा भक्तिर्यथा —

हे धीराः शृणुताहतानीदपरं संसारसारं परं
किं स्याद्‍ज्ञानसमाधिसाधनविधौ भूरि प्रयासेन वः ।
स्नेहार्द्रीकृतमानसा यदुपतावेकान्तभावं गता-
स्तत्प्राणास्तदधिष्ठितास्तदुदयास्तद्धर्मिणो जीवतः ॥ ९१ ॥

श्रीकान्तकृपया निजाङ्घ्रिकमलद्वन्द्वप्रपन्नं जनं
सर्वस्वार्थविलासभाजनमलं शश्वत्करोति प्रभुः ।
इत्यास्थामनपेक्ष्य केवलमसौ प्राणेश्वरो मे हरिः
प्रेम्णैवेत्थमुपासतो मुरहरं नित्यं नितान्तार्थिनः ॥ ९२ ॥

येषां श्रीव्रजनायिका व्रजपतेर्लीलाविलासश्रुतौ
प्रोत्फुल्ले नयने निकामजडिमान्यम्भांसि संमुञ्चतः ।
गात्रं चोच्छ्वतलोमसंततं भवत्येकान्तसौहार्दित-
स्तेषामेव पदाम्बुजद्वयरजः पृथ्व्याः परं पावनम् ॥ ९३ ॥

यः कृष्णाङ्घ्रिसरोजभावनमुदा निद्रायमाणः सदा
गायत्युच्चतरं क्वचिच्च नितरां मत्तः क्वचिन्नृत्यति ।
उन्मत्तो हसति क्वचित्क्वचिदपि प्रेमाकुलो रोदिति
प्रोत्यन्धो वसति क्वचिद्विवचनस्तस्यैव सज्जीवनम् ॥ ९४ ॥

चेतस्तुच्छमिदं विहाय भवतान्नित्यं तथा संयतं
गोविन्दादपरं श्रुतिर्न शृणुयाज्जिह्वा न संकीर्त्तयेत् ।
नेक्षेते क्षणमुत्तमाङ्गमपि नो वन्देत पाणिद्वयं
नार्च्चेन्नान्यपदं व्रजेत्पदयुगं श्रद्धावतो मे यथा ॥ ९५ ॥

हे ब्रह्माण्डकदम्बखेलनकला भूमेममासीदतो
माता त्वं जनकस्त्वमेवादयिता त्वं च त्वमेवात्मजः
त्वं भ्राता सुहृदस्त्वमेव परमो बन्धुस्त्वमेवात्मनः
सर्वं मे भगवांस्त्वमेव न पुनस्त्वत्तोऽपरं वेद्म्यहम् ॥ ९६ ॥

हे नाथ प्रियबान्धवस्त्वमसि मे याचामि नेह श्रियं
नामुत्रामरपालतां न च पुनर्ब्रह्माधिकारं ध्रुवम् ।
नापि त्वत्पदमच्युतं जगदघप्रध्वंसवाञ्छाम्यहं
त्वत्प्रेमान्धजनाङ्घ्रिपङ्कजरजो मूर्द्ध्ना ऽधिवोढुं परम् ॥ ९७ ॥

हे पङ्केरुहसोदरेक्षण हरे कस्त्वं नु किं रूपवान्
भक्तानां फलमादधासि कमिति ज्ञानेऽस्ति मे नाग्रहः ।
किं त्वेतावदधीश वर्त्तय विभो त्वत्पादपद्मद्वये
मातुः स्तन्य इवार्भकस्य विशतत्प्रेमार्दितं मन्मनः ॥ ९८ ॥

हे विश्वेश्वर वासुदेव कविभिर्ब्रह्मादिभिर्दुर्विदं
नैव त्वन्महिमानमूर्जिततरं जानामि मन्दात्मकः ।
प्रेम्णाथापि समाश्रिते मयि विभो कारुण्यपूर्णार्णव-
स्त्वं पाताऽन्वधिया सुधेव परमं संदर्शयस्त्वं गुणम् ॥ ९९ ॥

हे संसारपयोधितारक तव प्रोदीर्णकीर्त्तिश्रुते-
स्त्वत्प्रेम्णा पुलकाङ्कितस्य सलिलं नेत्रद्वयान्मुञ्चतः ।
त्वामेव स्मरतस्त्वदर्पितमतेस्त्वां गद्गदं क्रोशत-
स्त्वद्दत्तेन च जीवतो व्रजतु मे कालः सुखेनाखिलः ॥ १०० ॥

॥ समाप्तमिदं हरिभक्तिसर्वस्वशतकम् ॥

परिशिष्टम्

परिशिष्टम्

(१)

उपासनाशतकम्

यथैव ब्रह्माण्डे सुरमनुजदेहेष्वपि तथा
जगन्नाथो भद्रा वसति बलभद्रश्च नियतम् ।।
तथा ज्योतिश्चक्रे बहुपवननाड़ी नियमिते
तुरीयान्ते धाम प्रभवति हरिः कालकलया ।। १ ।।

सुधावार्धेरूर्ध्वे पुरुषशिवब्रह्मावतरका-
श्चतुर्व्यूहस्योर्ध्वे शिशुसमयलीलावृतपरे ।
रसातीते भावे सुरभियमुनायूथपतय-
स्तदूर्ध्वे श्रीदिव्ये गहनमपि कृष्णो निवसति ।। २ ।।

महायन्त्रे पीठे वसति त्रिपुरा सारुणरुचिः
परंब्रह्मासक्ता भयवरकरा दिव्यवसना ।
यदाज्ञामप्राप्य व्रजति नहि को वा परपदं
भजे नित्याधीशां कुसुमशरसंस्थाप्लुतभुजाम् ।। ३ ।।

गोलोकस्थौ दिव्यौ परमपुरुषार्थप्रकटितौ
परानन्दाभोगौ परमपरमौ कौतुकमयौ ।
मुनीनामाध्यानौ निखिल जगदाधारभवनौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि चरणौ ।। ४ ।।

सदा वृन्दाटव्यां सुरतरसिकौ नागरवरौ
समानौ सर्वेशौ भुवनमहितौ सारसमुखौ ।
सुवर्णश्यामाभौ सकलसुखपूर्णौ रसमयौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि चरणौ ।। ५ ।।

वयस्याभिः सेव्यौ नवनवरसास्वादनपरौ
शिवब्रह्माद्यवन्द्यौ प्रकृतिपुरुषौ सर्वजनकौ ।
अशेषब्रह्माण्डोद्भवलयकरौ कोमलतनू
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ ६ ॥

किशोरौ गान्धर्वौ सुरगणदुरापौ सुरुचिरौ
मनोभूसम्मोहौ सकलजनवासौ सुसुभगौ ।
निजक्रीडाचार्यौ शमनभगिनीतीरसदनौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ ७ ॥

जगन्नाथात्मानौ निगमगणसारौ परपदा-
वनन्तस्थौ नित्यौ सकलपरलावण्यभवनौ ।
जगन्नाथाव्यक्तौ निजभुवनभासौ पुरवरौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ ८ ॥

चतुस्तत्त्वेनाप्तौ मनुमयशरीरात्मपरमौ
सदा यन्त्रारूढौ नवनवरसाढ्यौ सुललितौ ।
मिथो दृष्टौ हृष्टौ निधुवनरसाचुम्बितमुखौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ ९ ॥

निजत्वेनानन्तौ निरवधिकृतालिङ्गनभुजौ
ब्रुवन्तौ शृण्वन्तौ स्वसुखरभसात्प्रेमविवशौ ।
शरण्यौ भक्तानां श्रुतिगणशिखावन्द्यचरणौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ १० ॥

त्रिसर्गान्तःस्थानौ शरदमलपद्मेक्षणयुगौ
शुचिप्रेमाभोगौ व्रजपुरविहारौ व्रजवरौ ।
सुभद्राश्रीनाथौ हलधरसमेतौ विजयिनौ
कदा राधाकृष्णौ क्षणमिह भजिष्यामि धरणौ ॥ ११ ॥

यद्राक्षामीति साक्षादभिलषति दिवश्चक्रवर्त्तीयतीनां
शक्रः संसारचक्रं भृशमपवदते यच्च निध्याय बुद्ध्वा।
चक्रीशो मूर्द्धनि धत्ते यदपि भगवानात्तचक्रोऽप्युपास्ते
शार्वे सर्वोच्चचक्रे जघनमितिमते मानसं संपृणक्तु ॥ २४ ॥

योगिप्रज्ञाप्यकामासममभिसृतवतो दुर्गमे योगमार्गे
चञ्चत्काञ्चीव्युदञ्चन्मणिरजनिकरद्योतदीप्ते विविक्ते।
यस्मिन् कृच्छ्राद्विशन्तो प्रियमहहसमासाद्य सद्यो विनोद्य
स्वैरं नैव व्यरंसीज्जघनसुपुलिनं दीनबन्धोरुपाध्वम् ॥ २५ ॥

शम्भोर्गम्भीरनाभीसरसिगतरसस्याशिशीर्यद् भवान्धोः
पङ्कैः स्वच्चन्दनाद्यैः कलुषितवपुषः साधु गहध्वमद्धा।
यस्यात्र सन्महेन्द्रोपलपटलवलच्छृंखलोच्छृंखलोस्र-
स्रोतः प्रोतस्य रोमावलिरुपरिपरिवाहशोभामुवाह ॥ २६ ॥

मोहक्रूलोभदावज्वलजगदटवीव्याकुलीभूतचेतः
सारङ्गोत्तालजालायितविषयचयच्छेदने शस्त शस्त्री।
ध्यानाध्वश्रद्धावन्नियमवशजनस्यावलम्बाय यष्टिः
स्वेष्टायोत्तिष्ठतां मे शिव तव विमला श्यामलारोमराजः ॥ २७ ॥

माव्यास्मिन्रोमराजिर्भवगदविपदे योगधावल्लिरास्ते
शामन्त्य अह्नि पुण्ये सुकृतिषु खलिनो यामिनीषु ज्वलन्त्याः।
एतस्याः काञ्चिरोचिर्मयसलीलभृता वालवालाभनाभे-
र्निष्कानिष्कासभासोऽप्युपरिपरिलसत्स्वच्छगुच्छायमानाः ॥ २८ ॥

श्यामा रोमावली ते मृड मृडयतु मां नाभिकासारसारे
निर्मज्जत्सज्जनान्तः करणविरहिता तामसीरेखिकेव।
काञ्चीरोचिः समङ्गोदरसरसि सरत्कान्तकान्तिप्रवाहे
सौन्दर्योद्यत्प्रतिष्ठे मरकतघटितभ्यस्तयूपाभिरूपा ॥ २९ ॥

रक्षेत्यृक्षस्य वक्षस्तदखिजगतोप्लावकाशाधिवास-
प्रोद्यामद्योतमानोदरकुहरपुरोगोपुरोद्यत्कवाटम् ।
या श्रद्धाबुद्धिरेतत्प्रभुवर कृपया सान्तरानन्तरा या
योगीन्द्राणां विशेच्चेत्प्रतिगुडकमसौ लोकतेऽशेषलोकः ॥ ३० ॥

शम्भो सर्वागमेषु प्रसृमरमहिमाबाहुकल्पद्रुमाली
सापर्णाभोगभूमि स्दढानिहितपदं रोप्यता स्वान्तसीम्नि ।
आक्रामद्भिः शनैः स्व लुटतु कलिरथा षड भिरुच्चैरामत्तै-
र्विश्राम्ये देव जीवोऽपि च परमसुखं प्राप्यस युक्ततापः ॥ ३१ ॥

बाहा श्रीभद्रबाहा मदनविजयिना यत्तटीवाजभाजः
संसारक्षारसिन्धुप्रतरणतरणेः पुण्यलावण्यवाराम् ।
स्रोतस्यन्तस्तरन्त्या मणिगणकिरणैस्तत्तु सन्तानकल्पै-
रातः प्रात नु बद्धा अविरतमभित. पातु काः कलिपाताः ॥ ३२ ॥

लुण्टाकाः कण्टकानां दनुतनुजनुषां श्रेयसामायुषां वा
निःश्रेणीश्रेणिरुच्चैर्दुरधिगमतमा कुण्ठवैकुण्ठधाम्नाम्
गीर्वाणग्रामणीनां सभयमुपयतां निर्भरं निर्भरुगं
चत्वारो बाहवस्ते रतिपतिमथितुर्मङ्गलं वृंहयन्तु ॥ ३३ ॥

यानाहु स्वैवयोगात्परमगतिविदः सत्पथादस्खलन्तः
प्रज्ञाचक्षुः पुमांसोऽप्यनवधिविबुधः षड्द्विषो दण्डयन्ति
दण्डादण्डोति युद्धं विदधति च यमेनाग्रदण्डेन तस्य
दुर्दण्डैर्बाहुदण्डैर्मम मदनमुषा दण्डयतां पापषण्डम् ॥ ३४ ॥

ताम्रानम्रांशुपात्रं करमनिशमसावूर्मिकां शूर्मिकाणः
पूर्णं गृह्णन्नशीर्णाक्षतवलयवलद्गारुडाश्वोस्रदर्भैः
युक्तं कीर्तिप्रसूनैः सुरभितमभितोऽनल्पसंकल्पितार्थो
सृष्ट्यै कृत्स्नस्य संकल्पयति भयभुजः श्रीभुजं तं भजेत ॥ ३५ ॥

शेषाधीशस्य शस्या युगयुगयुगलस्यानुरूपस्वरूपा
देहव्यूहप्ररोहा इव भुजगभुजा भावनीया विनीतैः ।
स्वाराजो गर्वसर्वस्वपरिपणचतुर्दन्तदन्तीन्द्रशुण्डा-
दण्डाश्चत्वार एते तत इयमुचिता पुष्करश्रीर्यदन्ते ॥ ३६ ॥

क्रोड़ क्रोडन्मुरारिगलतलमिलिताः पुण्डरीकस्रगाभा
ज्ञानोन्मीलन्मुनीनां नयननिपतिता साधुसौधप्रवाहाः ।
रुक्षोद्यद्रक्षसान्तःकरणपरिसरे कल्यशल्यायमाना
दोषा भूषाविशेषाः शुभरसमदृशोऽतीव पावान इड्य ॥ ३७ ॥

वर्णानां यच्चतुर्णां युगपदपि चतुर्वर्गमुत्सर्गसिद्धं
चक्रे शक्रोड़ताग्रैस्त्वरुणितकिरणं तच्चतुष्पाणि पातु ।
आमृष्टं त्रैपुरस्त्रीनिटलतलामलत्सान्द्रसिन्दूरबिन्दो
रागैर्मत्त्वेव जुष्टं वलयसितशिलाः स्वाः करैयन्मृजान्ति ॥ ३८ ॥

आम्नायामात्तधाम्नो निगमपरिगतौ तौ पणायेत पाणी
बिभ्राणौ यौ वरं चाभयमुभयमुभौ प्राणिनां प्रीणनाय ।
ऊर्ध्वं चाधःस्थितानां सुरवरफणिनां वीक्षण केलिभाजां
निर्व्याजं सज्जमानौ किमु नयनपथे पुण्यकारुण्यवेशात् ॥ ३९ ॥

आक्रोड़क्रोधलोभप्रभृतिगजगणे यूथनाथायमानं
मोहाह्वानं महेभं भयभरविधुरद्राविमत्वे मदीये ।
अन्तः कान्तारमध्ये चिदभिधविबुधानोकहोन्मूलनोच्चै-
र्मूलं प्रोदञ्चपञ्चाननननखरशृणिश्रेणयः प्राग्गृणन्तु ॥ ४० ॥

श्रीकण्ठः श्रीकुठारो मदघवनघनी भूततां जंघनीता-
द्रक्षा विख्यातदीक्षा सततधृतव्रतः श्रीप्रभो रोषवह्नौ ।
योऽसौ होता समेता सुरवरशिरसां सत्पुरोडाशभासां
हाहा स्वाहाकृतीनां विदधदथ जगत्स्वस्थयत्येव सत्यम् ॥ ४१ ॥

तत्कण्ठोद्घट्टनोत्थज्वलनकणगणैरुण्वणं यस्तड़ित्वान्
तत्कान्तानां समन्तात्सकरुणरुदितैर्गजितं चातिगर्जन् ।
तासामस्रं च वर्षन्नृनवधिपरशोः संस्मराम: स्मरारे-
रुग्रक्रव्यादवर्गं प्रलयजलधरस्यैव धोरायितानाम् ॥ ४२ ॥

हस्तोद्विङ्गत्कुरङ्ग: कृपयतु स विभोरोदगालिङ्गभङ्ग्या
यो माने चाप्यमाने समदृगनिवसन् संचरन्नेक एव ।
पुण्येऽरण्ये तरण्यंशुभिरपि जलमुग्धोरधाराभिराराा-
त्ताडयोऽप्यस्यद्विकार: स हि भगवदुपादेय इत्यादिशक्तिम् ॥ ४३ ॥

श्री शम्भोर्कण्ठकम्बुर्भवतु भवभये गूढमाम्नाय वर्णैः
पूर्णं लावण्यपूरैर्मनसि मुनिजनो यं निधायार्घपात्रम् ।
स्वस्मिन् संगृह्य तस्मादमृतमथ दृगालोककल्लोलसेकैः
संस्कुर्वन् पूज्यवस्तून्यपि निकटचरप्रोक्षणोपात्रमास्ताम् ॥ ४४ ॥

श्रीश्रीकण्ठस्य कर्णं परिचररुचिरं सावलेखाभिलेखं
व्यानद्धं कालपाशैर्गलगिलनमिलच्छ्यामलिमाछलेन ।
वात्सल्योत्सेकदर्शं निजभवनयुजां कालपाशावलोनां
योऽजस्रं स्वेदविश्रंसयति जगति तेऽस्मादपाशा: प्रथन्ते ॥ ४५ ॥

आद्या विद्या जरार्त्ता बहुविषयरसैर्निर्भरं पूर्णगर्भा
प्रोद्यन्निध्याद्यपथ्याहितपरिणतयोऽनर्थवाचो विगूढा: ।
यां पीत्वा चित्तपात्रैरथ विगततृषस्त्यक्तपापा: स्वतिष्ठन्
श्री कण्ठस्याश्रयन्तां भवभयभिषजः कण्ठकाकोललक्ष्मीम् ॥ ४६ ॥

श्री वां श्रीवामदेवौ स्वहृदि कलयता ध्याननिध्यानभाजां
मध्यश्यामापदेशात्कलिकलुषमिवाच्छिद्यहृद्यावहन्तीम् ।
उद्यन्नानामतेनाङ्गजविततिभृता निर्विरोधं त्रिरेखा
चातुर्वेदेन यस्यां निजजनकभुवि स्वस्य सीमा विभक्ता ॥ ४७ ॥

तं कण्ठं शूलपाणेर्नम समुपनयन्मार्गणेऽनर्गलेन
द्राङ् निर्गच्छत्त्रिवर्गप्रसरणसरणीराददानं विरेखाः ।
व्रज्याराज्यद्गुणानां चरणशरणिनां बन्धनं मोचयित्वा
स्वात्मन्यैतद्गृहीत्वा वसति निजपुनर्बन्धनाशङ्कया यः ॥ ४८ ॥

कण्ठे तिष्ठेत मुक्त्यै मदनमदभिदः प्राङ् निलिम्पानुकम्पा-
संपातैः पारवश्याद् गरलमिव गिलन्क्षुब्धदुग्धाब्धिलब्धम् ।
भक्ताधीनोऽधुनैषां विषयविषरसाद्या भवाब्धेः प्रसूता
न भीतीदं नराणां गिलनगुणनिकापाटनाज्जाघटीति ॥ ४९ ॥

कण्ठः सोऽकुण्ठशक्तेः परिलुठतु हठाच्चित्तपीठोपकण्ठे
कम्बोः किं वानुबिम्बः किमसमसुषमासीमविश्रामधाम ।
आलेख्यालेख्यलेखात्रयरुचिररुचाभूषि भूषाविशेष-
मध्योद्यच्चारुगारुत्मतमणिसमरुक्कोमलश्यामलोयः ॥ ५० ॥

गौरीगाढोपगूढैः प्रतिफलितमिदं शस्तकस्तूरिकायाः
पङ्कं शङ्के शशाङ्काभरणगलमिलन्निलिमा शीलनीयः ।
रोलम्बानां कदम्बं मुनिनयननिभं सन्ततामोदलाभे
लोभाद्यस्मिन्नुपतित्वा न खलु पुनरुपावर्त्तने कष्टमिष्टे ॥ ५१ ॥

शम्भोः शं भो दिशेद्वो भवदवविधुराः कण्ठगर्वषुं काभ्रं
मुक्तास्रक्सद्वलाकेऽनवरतविलसत्पुण्यलावण्यनीरे ।
ग्रैवेयव्यग्रनानामणिकिरणगणैरिन्द्रचापाभिभूतो
यत्रोद्यद्विद्युदास्ते गिरिदुहितृपरीरम्भसंराभबाहूः ॥ ५२ ॥

गुच्छावल्यन्तरच्छच्छविविभवमहानीलशैलोपलेयां
मध्ये कण्ठस्य कुण्ठेतरतरुणघनश्यामशोभां प्रतीमः ।
यो योगाद्योगभाजां विषदतरनिसंदिग्धदुग्धोपलब्धेः
स्वान्तस्यान्तर्निलीनोऽधिगमयति निजाकारसाकारभावम् ॥ ५३ ॥

भस्मस्मेरत्रिपुण्ड्रोज्ज्वलनिटिलतटं बिम्बसम्वादकोष्ठं
निर्निकाशस्वनासाश्वसनबहुगुणं जैत्रनेत्रत्रयीकम् ।
अम्भोजाम्यर्णघूर्णद्भ्रमरपरिकरभ्रान्तिभृत्श्मश्रुलेखं
भो भोः शम्भोर्मुखाम्भोरुहमनुरभसं चेतसा चिन्तनीयम् ॥ ५४ ॥

ग्रैवेयोदग्रजाग्रन्मणिभिरपितथा मौलिचूलोपलानां
रोचिर्वीचिप्रपञ्चैः परिधिविधिरधिष्ठीयते यन्मुखेन्दोः ।
बिभ्रद्भ्रूविभ्रमाङ्कं स्मितसितलसितप्रांशुदन्तांशुराशीन्
वर्षन्पीयूषवर्षं दिशि दिशि दिशताद्वेगहर्षप्रकर्षम् ॥ ५५ ॥

स्वेनासीम्ना महिम्ना यदिह उडुपतेर्मण्डलं मंक्षु तीर्त्वा
जीवग्राहं गृहीत्वा तमथ सुरसरिल्लोलकल्लोलपूरैः ।
भालाक्षणोज्ज्वालजालैरपि विषमतमे कुत्रचित्स्थापयित्वा
क्षामं क्षामं क्रमेण क्रशयति तादिहोपास्यतामैशमास्यम् ॥ ५६ ॥

पात्रं नित्यापवित्र्या अथ कमलवनोज्जासनो विप्रयोगे
योऽयं भास्वत्स्वरूपो बहति किल सदा यामिनीचूडभासः ।
चिन्ताकूत्नारकान्तः परमहिततरोऽप्यन्धकारातिरोची
राजद्वक्त्राच्छधामा समहिम उचितस्ते महे द्रागुदेतु ॥ ५७ ॥

अञ्चेद्यः पञ्चकं तत्सुमतिरतिमहच्छैववक्त्राम्बुजानां
श्वासीत्तस्य त्रसन्तो शिर उपरि नरीनर्त्तिता पञ्चता सा ।
संचञ्चत्पञ्चकं तद्भृशवशमयते चेन्दितामिन्द्रियाणां
दुःसाराणां शराणां तदपि शिवरिपोर्नाजिहीते तदन्तम् ॥ ५८ ॥

स्पर्ध्या बालेन्दुमौलेर्विषदतरसरत्स्यन्दिचन्दत्पीयूषा-
सारासङ्गाद्द्विगुणमधुरमधुरताधोरणी साधरस्य ।
आस्वाद्यं यन्मुनीनां सवनजममृतं देवभोज्यं परं यद्
दिव्यं राद्यं जयेऽस्मिन्न रुचिरुदयते तोषलेशाद्विभासे ॥ ५९ ॥

तां दन्तश्रेणीमुक्तास्रजमसमदृशोः हस्तसादेव कृत्वा
भक्त्यात्युच्चैर्वपन्तो मुनिवर जनता साधयेन्मोक्षलक्ष्मीम् ।
निध्यायाध्यास्यमानां हृदयपरिसरे मौक्तिकोच्चैर्घनानां
यां तत्तद्रत्नवृन्दं चपलतरमितो लज्जया निर्जिहीते ॥ ६० ॥

घोणावंशोऽस्य नासस्तिलकुसुमतुलामाददानोऽयमेवं
वादो लोकापवादो नहि तिलकुसुमैराप्यतेऽमुष्य गन्धः ।
यस्याम्नायामलानां श्वसितसमरतां भव्यसौरभ्यलोभात्
भ्रान्ता रोलम्बमाला भृशमसृणमसोचीर्णवर्णायितास्ते ॥ ६१ ॥

दृष्टिर्भव्याय भाव्या सरभस पतिता यां विभोर्भक्तगात्रे
दृष्ट्वानन्दानमिन्दोद्यतजलैः कण्टकैः संकटे च ।
नार्हन्तो क्वापि गन्तुं बुविबुध दृशस्तस्य साजात्यहार्दा-
द्धस्तग्राहं निनीषादरभरभरितां संभ्रमात्संपतन्ति ॥ ६२ ॥

देवश्रेणीषु गौरीवदन इव तपोनोदने मोदमाना-
स्तस्याश्चञ्चद्व्युदञ्चत्कुच इव सुचिरं लोलुपा भक्तपंक्तौ ।
किञ्चित्संचारिचेलाञ्चल इव जघनेऽकिंचनव्यग्रलोभा-
न्नानाभावेन भाव्यास्त्रिपुरहरदृशोर्निर्भरं भावनीया ॥ ६३ ॥

या सोदर्येव तौल्यान्महिमनि चतुरो वर्गसर्गान् स संख्या
वैषम्येणाविभाज्यान् जनकचिरचितद्रव्यवत्पाल्यमानान् ।
साधारण्यादनास्थं वितरति नितरामग्रतः स्थायकेभ्योऽ-
न्योऽन्यस्पर्द्धाभिगर्द्धादिव मदनमुषः सास्रजैत्री त्रिनेत्री ॥ ६४ ॥

श्यामानुध्यानसोमारुणिमतरुणिमालिङ्गितापाङ्गरङ्गं
सत्तीरं (?) तत्परत्रोल्लसितसितरुचा रोचमानं त्रिचक्षुः ।
एकेनैव त्रिलोकी कृतिभृतिविहृतीः कर्त्तुमादाय मूर्त्ति
त्रैगुण्यं किं नु मन्ये नयनविलसिताघोनसर्वक्रियस्य ॥ ६५ ॥

गावो भावोपरवतं झटिति पशुपतेः साधुबोधाधिरोधात्
पुष्पंदुं वासनाभिः किल कलिलतमे मामकान्तश्चरन्तु ।
अत्यच्छान् भक्तिवत्सान् स्थिरसुदृढतरं भ्रातृस्नेहेन भेजे
या दुग्धानीव दुग्धा विविधमहिमतं योगदग्धैर्विदग्धैः ॥ ६६ ॥

दृष्टिं तां विश्वसृष्टेरतिशयललितां ध्यायतामात्मबुद्धया
बद्धा देवेषु सिद्धादिषु च बहुचरं संभ्रमाद्या भ्रमन्ती ।
मूर्च्छामिच्छत्यतुल्यां निजजनजनकाङ्कं विशङ्कं हि तत्त्वा-
द्रूपप्रीत्यातिहर्षाश्रुभिरथ सुखिताप्यायते प्यायतेच्छम् ॥ ६७ ॥

शोभाब्धेरुज्जिहानां चिरमुपचरितां चामरालीमरालै-
र्भूकम्पान्तर्मिलिन्दस्वदितसुचरितामन्दछन्दानुरन्दाम् ।
उच्चैर्वाचं यमानां विषदविसृमरज्ञानधारामृणालीं
चक्षुर्नालीकपालिं हृदि वहत विभोस्तापशान्त्यै नितान्तम् ॥ ६८ ॥

लक्ष्मीव लक्ष्मलेखाश्रयविषमदशोऽनुक्षणे नेक्षणं तत्
सुस्निग्धश्यामधामोत्तरलतरपरिष्कारकृत्तारकं यत् ।
भास्वत्सेन्दिन्दिरेन्दीवरतरविधया श्वेतरक्तासितोत
त्रैवर्णोत्कोणजन्यद्युतिततिविततं सर्ववर्णाश्रयेऽपि ॥ ६९ ॥

शम्भोर्नम्येत वामेतरनयनमजसम्भवोद्दामधामा
धर्मांशुः स्वैः करैस्तैस्तरणिभिरननुष्ठेयमेवानुतिष्ठन् ।
स्वेषां मत्तः समन्ताद्विततततमतम मर्मं निमन्त्र्यकर्म
शिष्टानां विष्टपानां लयविषयचयाव्यञ्जयत्यञ्जसा यः ॥ ७० ॥

दृष्टिर्भाव्यापसव्या तरणिरियमहो कर्णधारत्वमस्या
पश्यासौ पारतीरं भवनिभजलधेः पारकांक्षित्वभाजः ।
नित्यानित्या च सक्तानुपहृतभजनैकाग्रताकल्यमूल्यान्
धन्यानन्यानपेक्षं गमयति निगमप्रान्तराश्रान्तपान्थान् ॥ ७१ ॥

लीलालोलाञ्चलाल्पारुणिमधवलिम द्राक्चलन्निश्चलेन्द्र
स्वाराज्यं प्राज्य कर्मादिभिरभिलभितस्निग्धमुग्धावलोकम् ।
रक्षत्यक्षेन्दुनेत्रं निजजनममृतेनोक्षयाप्याययद्यद्-
योगीन्द्रानन्दसिन्धुं स्थगयति भृशमध्यात्मलेशोदयेन ॥ ७२ ॥

चण्डाग्निदृष्टकुण्डे स्मरनिटिलतटी मण्डपे हिण्डमानं
कल्पान्तान्त्येष्टि यज्वा समुदितजगती सामधेनी समिद्धम् ।
यस्य ज्वालाद्विजिह्वामनुमदनमयोद्गीर्णपूर्णाहुतीनां
जुहूप्रह्वातिभासां निजपरुषरुषा शान्तकर्मान्तरोऽभूत् ॥ ७३ ॥

कामक्रोधादिबाधादुदयदुरुमरुद्वेपमानोऽतिमज्जन्
संसारापारवारांनिधिषु विरमधादुच्चरोद्गद्गदोक्तिः ।
आढ्येनाढ्यं भविष्णुर्यदुपगमवशादस्तजाड्यादिरास्ते
सुस्थः स श्रेयसे स्तान्निटिलगनयनं चाश्रयान्नाश्रयाशः ॥ ७४ ॥

लालाटीदृष्टिरिष्टं झटिति घटयतु द्रष्टृपंक्तौ सुखाना-
मद्वैतं मोक्तुमिच्छौ निजसुकृतपरिपाकपात्रानुरूपम् ।
भूयः प्रेङ्खत्कटाक्षामृतमतिविषदं व्युत्क्रमेणोद्धरत्या
अत्याश्चर्यं तथापि स्थितिरतितपना जागरूकास्ति यस्याः ॥ ७५ ॥

कल्पान्तोत्तानकालानलकुटिलचलज्ज्वालजिह्वा करालं
तापार्त्तं श्रीलशीलां सजलजलमुचां शीलयद्यत्तथापि ।
तार्त्तीयीके क्षणं तत्स्मरत मखमुषो दग्धकामादमुष्माद्
आश्चर्य्यं वीतकामाः स्वयमपि मुनयः पूर्णकामा भवन्ति ॥ ७६ ॥

ज्योतिः सर्वातिशायि प्रभनिटिलतटी लक्ष्मणोऽभीक्ष्णमक्ष्णो
बुद्धया दध्यादमुष्मिन्यतिवरदहरव्योमनि भ्राजमाने
क्लेशाश्चार्कप्रकाशोऽपसरति विषयज्योत्स्नया वाक्यलीनं
किं वान्यद्यस्य पश्चादनुसरदवचोगोचरं ज्योतिरास्ते ॥ ७७ ॥

रौद्रे भालाख्यभिख्या मदनपितृवने भैरवी भावनीया
सिद्धा वेदैकवेद्यागमसुगमर्मतिभक्तिमाध्वीकमद्यैः ।
जीवं यस्यै निवेद्यामृतमथ किमपि प्राश्य दूरे च कृत्वा
प्राकृत्याक्षेपमेतद्विषयसमुदय विस्मरन्नेव माद्येत् ॥ ७८ ॥

अग्यूैरुग्रैः स्ववर्गैर्व्यवहितकृपणानुग्रहव्यग्रभाव-
प्रादुर्भावाय यद्रूः किल तादितरयोर्नेत्रयोरूद्धर्वमास्ते ।
के नानाम्नायधाम्नां ज्वलति जगति च श्रीप्रभोश्चौपमौलि-
ग्राह्या सा भालदृष्टिः कृपयतु भवतो भीतभीतान् भवार्त्तेः ॥ ७९ ॥

भैमं भालाक्षिभाव्यं मुनिजनमनसां भक्तिसाम्राज्यभाजा-
माजन्मखण्डदण्डायित सुकृतशतेनाप्य मध्यूषुषां यत् ।
श्वेतच्छत्रायमाणा शिशिरकरकलाकोटिकाटोरहोर-
द्योतश्चन्द्रातपाभश्चलविततकरे कुण्डले चामरे द्वे ॥ ८० ॥

खद्योतद्योतवद्योऽहनि वत विशतां शीततामागतोऽसौ
क्रूरः कालाग्निकीलोभर्वविभवनिभः ·· ··· दशीर्यत्[१] ।
सम्वर्त्तोद्वृत्तनृत्यद्द्युमणिघृणिघृणाप्रस्तुवन्तं वितन्त्रं
चन्द्रापीड़े तमीड़े कटुविटकुटिलं नैटिलाक्षणं कृशानुम् ॥ ८१ ॥

चण्डीकान्तस्य गण्डस्थलममलतलं राजतादर्शदृश्यं
सौम्न्यास्तां दर्शनीयं हृदि तव यदहो यत्र योगीन्द्रचित्ते ।
यद्यासीत्साम्मुखीनं क्षणमिदमुदरे देशतः कालतो वा
सोत्कर्षं विप्रकर्षन्नपि विषयचयः प्रत्यहं प्रत्यफालीत् ॥ ८२ ॥

सव्रध्नुटश्रोत्रकूपं कलयत ललितं सामनीषा मुनीशां
यत्प्रावत्येन पूर्वं तटनिकटचरी संसृतेः खिन्नखिन्ना ।
चातुर्यं प्रेर्यमाणा यमनुनिपतितान्न त्यजेद्य समाधि
दूरे कृत्वा कलिं तत्त्रिजगति विदितं दीर्घदर्शित्वमस्याः ॥ ८३ ॥

---

१ । पाठः कीटदष्टः ।

बालेन्दुं चन्द्रमौलेः स्मर सततमसौ शाम्भवोऽस्मीत्यहंयुः
प्रोद्यन्नास्ते ममास्तेऽप्ययमिति तरणावीर्ष्यया कर्षितांशुः ।
मुक्तिद्वाराधिकारं तदधिकमतनो द्वादशात्मा स चासी-
न्नानात्मास्यामितोच्छुः स्वनतिनतिकृतश्चन्द्रचूडानकार्षीत् ॥ ८४ ॥

स्वर्गाद्गङ्गाप्रवाहः सगरसुतचिताप्यायनायायमानोऽ-
शंक्य तत्साहसिक्यं त्विदमिति विमृशन्नम्बरमध्येऽप्यबोध ।
सन्त प्राज्यायनं यत्सविधमधिवसीकृत्यकृत्यं समागात्
सांघ संघातहृत्यै रजनिकरकला शाम्भवी वो भवितात् ॥ ८५ ॥

न व्याधिव्याधबाधा न च भवदवजाज्वालमाला न बाला
बालाह्वा वागुरावेति च विमृशमनः कोररेनो नयास्याम् ।
सांनिध्यात्सिद्धसिन्धोरतिशयसुभगा भावुकं भावुकानां
मूलं नानाफलानां प्रलयनटजटाजूटकूटाटवीयम् ॥ ८६ ॥

भाव्या भावाः कपर्दीमुकुटपुटनटद्धेमरुग्वल्लिकल्पा
योगीन्द्रस्येन्द्रियाणामुपयमनकृते छद्मवत्सज्जमानाः
ध्यानाध्वन्यध्वनीनाः क्वचिदपि न भवसंशया नाशयानां
दुःसर्पा एत एवं यदुद भवदहो नित्यनिर्बाधबोधः ॥ ८७ ॥

सर्वासर्वाघसंघक्रथन कृतिकृते हैमवत्या [वरस्य][1]
स्फोटत्कोटीरकोटि नटतु पटुतरं हृत्तटे धूर्जटेनो ।
नाडीनामेकघाटो यदीयमृषितते: प्राणसञ्चारिणीना-
मस्यां पश्यन्ति विश्वे प्रतिनियतमते जीवनस्यानुबन्धम् ॥ ८८ ॥

त्र्यक्षे जूटकूटे विहरतु हृदयं ब्रह्मवद्यन्नमेयं
तत्तादृग्ब्रह्मलोकादपिपरमसुखस्यास्पदं च प्रतीमः ।
यद्भक्त्या ब्रह्मलोकात्त्रिदश सरिदुपागत्य ...... त्वरेण[2]
स्वच्छन्दं स्यन्दमाना चिरमिह परतो गन्तुमिच्छामहासीत् ॥ ८९ ॥

---

१ । है ...... पाठः कीटदष्टः ।

२ । पाठः कीटदष्टः ।

अध्यारोहन्तु तेऽन्तः करणतरुवरं प्राणिसत्कर्मराजी-
बीजात्संजायमाः पुरविजयिजटाकल्पवल्लीमतल्यः ।
या सामा मानलीलावलिशशिकलया याश्च संकल्पपूर्त्यै
कल्पन्ते निर्विकल्पं सकलसुमनसां चाश्रमाणां फलानाम् ॥ ९० ॥

श्रीपक्षीन्द्रध्वजेनादृतमहिमतते रक्षतात्केशपक्षो
हंसोत्तंसाधिकारं मनसि बहुचिरेणेप्सितं स्वाधिकारम् ।
भक्त्या यं पक्षयित्वा गतिविदग्रगणोत्पक्षतीनां यतीनां
धिक्कृत्वा षड् विपक्षान् सुखतरमयते तत्पदं तादृगुच्चम् ॥ ९१ ॥

ब्रह्मज्योतिर्विवर्त्तायितनिजसलिले जह्नुजे स्वामिशीर्ष्णां
सीमोपस्मारकारिण्यपि निरयरयो पर्यतामार्यवर्यं ।
यत्त्वं दुर्बोधितत्त्वे भगवति भवतीं ये नमन्ति हसन्तः
तेषां मूर्द्धानमारोहसि तव तदयं दुर्विभाव्यः स्वभावः ॥ ९२ ॥

आरोढुं ब्रह्मधामस्फटिकमयमहोतानसोपानपाली
ब्रह्माण्डे ब्रह्मणा या श्रुतिसुरसुरभेदुग्धधुरधायमाना ।
संघातानंहसां मे बहुमहिमभरैर्भासुराणां सुराणां
मूर्द्धन्यस्यापि मूर्द्धन्युपरिपरिपतत्स्वर्द्धुनी निर्द्धुनोताम् ॥ ९३ ॥

स्वर्भाजो मिष्टभोजी गलगरलगिलो भूरिभोगो विभोगो
नित्यं द्वैधुर्यधुर्योऽनवरतमधुरः कामधिक्कारकारी ।
संपद्यन्ते यदेते विभुमुकुटमणे देवि तेवामदेवे
सम्बन्धस्यानुबन्धात्फलमखिलमिदं जह्नुकन्येऽद्य मन्ये ॥ ९४ ॥

येऽघोऽपत्पनसुतप्तं निजघनवृजिनैर्निर्भरं दुर्भरत्वा-
दूर्ध्वं ते यान्ति धौताखिलमललघवोपपृषत्स्पर्शलेशात् ।
आनन्दाद्वैतपद्या पथिकनिजजनो ब्रह्म सब्रह्मचारी
गाङ्गं पूरः पुनीतां प्रभुतनुरुचये नित्यदत्तस्वहस्तः ॥ ९५ ॥

सा विस्रोता पुनीतां त्रिभुवनजनतापावनी जीवनी या
वैकुण्ठे तन्निनीषारभसपरवशत्वाद्बहिर्भूय तस्मात् ।
येऽजिह्मं ब्रह्मलोकं प्रतिजिगमिषवस्तादृशानां महेश-
स्यांघ्रेर्मूलं हि मूलायतनमितिमतिन्नूनमत्रागतास्ते ॥ ९६ ॥

गौरीभर्तुः शरीरं विमृशत सुषमासीमरत्नाकरेऽस्मिन्
संमीलद्दृष्टदृष्टिस्वसनततितदेकाग्रजाग्रन्नितान्तम् ।
मज्जन्तो दासवर्या हृषिततनुरुहाः कम्पसम्पन्नदेहा
लब्ध्वा चिन्नूत्नरत्नं कथमपि सुचिरेणैव निर्वान्ति हन्त ॥ ९७ ॥

शश्वत्कस्मै चिदस्मै दुरधिगमतमैश्वर्यभाजे नमस्ते
गौरीयानेऽद्य जाने कियदभिलषतेऽकिंचनानां चयाय ।
यत्त्वं सायुज्यचर्यां वितरसि तरसा सर्पकोटीकरोटी
माला हालाहलाद्यैर्द्धनवत इहते दुर्गति त्वं हि बीजम् ॥ ९८ ॥

मुक्तिश्चाधूलिकेलिप्रथमसहचरीवास्ति यस्यास्ति वश्या
दासीवासौत्रिवर्गो विधिविधुपदवी साधुसैरिन्ध्रिकेव ।
त्यक्त्वातङ्कं यदङ्के दुहितृवदनिशं चेष्टते चाष्टभूतिः
सा भक्तिर्भक्तबन्धौ जगदशिव शिवे श्रीशिवे नित्यमास्ताम् ॥ ९९ ॥

पायादायासखेदक्षुभितफणिफणारत्ननिर्यत्ननिर्य-
च्छायामायापतङ्गद्युतिमुदितवियद्वाहिनीचक्रवाकः ।
अभ्रान्तभ्रान्तचूडातुहिनकरकरालोकनालोकनाल-
च्छेदामोदानुधावद्द्रविणरथखगं धूर्जटेस्ताण्डवं वः ॥ १०० ॥

नाट्यं खट्वाङ्गपाणेर्मनसि नटयताद्विभ्रमेण भ्रमाणा-
मामूलच्छिन्नबन्धभ्रमदखिलजगद्दारुणं प्रस्तुतेऽस्मिन् ।
घूर्णद्भूचक्रघृष्टोत्कटकमठमहापृष्ठनैष्ठुर्यनिष्ठा
निष्ठ्युताच्छन्नपारज्वलनकणगणैर्दीपिकाकृत्यमासीत् ॥ १०१ ॥

उन्मीलत्कम्पसम्पच्चलदचलमिथः स्पष्टसंघट्टरुग्ण-
ग्राव्णां निर्घोषदैर्घ्यं पटुपटहरवाडम्बरोऽपि व्यडम्बि ।
उद्वेलदोद्वेल्लदब्धेः समसमयवलल्लोलकल्लोलताने-
रुत्तालातालतलीलाभयसमुपनमद्ब्रह्मकाकुश्च गीतिः ॥ १०२ ॥

शीर्षाणि न्यञ्चि किंचित्त्वयि विदधति ये तेष्ववांछद्भिरञ्चि-
र्यं स्तावत्स्तावकस्ते तमपरपरिषद्व्यस्तमस्ता स्तुवीतात् ।
धत्ते चित्ते प्रमत्ते य इह तव पदं तं च मध्ये समाधि
ध्यायेद्योगीन्द्रवृन्दं प्रणतसुरतरो तं भवन्तं प्रपद्ये ॥ १०३ ॥

॥ इति शिवशतकम् ॥

— o —